अथैकदा पद्मावत्योक्तम् । प्राणेश्वर, दिवसे क्व गतास्तिष्ठति भवान् । तच्छ्रुत्वा कुमारेणोक्तम् । मम प्राणसमः सखा बुद्धिशरीरो यत्रास्ते । तच्छ्रुत्वा पापकारिण्या मनसेति चिन्तितम् । यदि विचक्षणोऽस्ति मम प्राणेश्वरमादाय स्वदेशं यास्यति । तदाहमेतस्य विरहे कथं जीवयिष्यामि । ततस्तं निहत्य कालं नयामि । ततो महतादरेण विषसहितद्रव्यं बुद्धिशरीराय प्रस्थापितवती । बुद्धिशरीरो मतिमान् द्रव्यमवलोक्यावगततत्त्वो मित्राय ज्ञापयामास । मित्र, अत्र स्थातुमिदानीं न युनक्ति । कुमारेणोक्तम् । कथमेतद्वद । मित्र, विषसहितभक्ष्यद्रव्यमवलोकय । ततो विचार्य तद्भक्षणमात्रेण जन्तुमेकं मृतमवलोक्य वज्रमुकुटो ब्रूते । मित्र, पापिष्ठामेतां निहत्य स्वदेशो गन्तव्यः । बुद्धिशरीरो ब्रूते । मित्र, नेयं वध्या यतो भवत्सु स्त्रीवधहेतुः । तस्माद् बुद्ध्येयं स्वदेशे नेतव्या । कुमारेणोक्तम् । कथमेतत् संभवति । अनेनोक्तम् । उपायं करिष्यामि ।

इत्येव काले कर्णोत्पलस्य राज्ञः शिशुः सुन्दरो डाकिन्या खादितः । उपायावसरं प्राप्य बुद्धिशरीरो वज्रमुकुटमब्रवीत् । सखे त्वमद्य गत्वा पद्मावत्या सममशेषक्रीडां कृत्वा तस्यां निद्रां गतायां सर्वाभरणमादाय लौहशलाकया तद्दक्षिणोरौ रेखात्रयं कृत्वा मत्समीपमागमिष्यसीति । अहं श्मशानं गत्वा योगिनो वेषधारी भवामि । इत्युक्त्वा बुद्धिशरीरो धुस्तूरादिकेन मोदकं कृत्वा तेनैव प्रकारेण वज्रमुकुटं प्रस्थापितवान् । वज्रमुकुटोऽपि तत्सर्वं समाचरितवान् । वज्रमुकुटस्तत्र गत्वाशेषरतिक्रीडां कुर्वन् धुस्तूरादिकरचितमोदकं तां भक्षयितवान् । सापि तत् खादित्वा निर्भयं निद्रां गतवती । अत्रावसरे वज्रमुकुटो लौहशलाकया तस्या दक्षिणोरौ रेखात्रयं दत्वा नानालङ्कारमादाय बुद्धिशरीरसमीपं समागतः ।

ततः सा पद्मावती प्रबोधं संप्राप्य वज्रमुकुटहीनां शय्या-

मवलोक्य बहुविधं विलपन्ती सर्वालङ्कारहीना कथमपि प्रातरुत्थाय पितरमब्रवीत् । तात मम सर्वालङ्कारश्चौरेणाद्यापहृतः । सान्धिविग्रहिकोऽपि राजानं ज्ञापयामास। ततो राजा चौरान्वेषणाय दुःसाधुमादिदेश ।

तस्मिन्नेव समये बुद्धिशरीरो वज्रमुकुटमब्रवीत् । सखे स्वर्णवणिग्गृहं गत्वालङ्कारं विक्रीणातु भवान् । ततश्चौरं कृत्वा कोऽपि त्वामाकर्षति । तदा वदिष्यसि । नाहं चौरः । किन्तु योगिनोऽलङ्कारविक्रयमाचरामि । यदि मद्वचने सम्प्रत्ययो नास्ति तदा श्मशानवासिनं योगिनमुपगम्य प्रतिसन्धानं कुरु । स यद्येतन्नाङ्गीकरोति तदा समुचितं फलं दास्यसि । इति निगद्य तमादाय मत्समीपमागमिष्यसि । भवति मत्समीपमागते मया तस्योत्तरं दातव्यम् ।

ततस्तदुपदेशेन स्वर्णवणिग्गृहं गतवन्तमलङ्कारं विक्रीणानं चौरान्वेषणं कुर्वाणो वज्रमुकुटं धृतवान् । अयं त्वं चौरोऽसि कृत्वा दुःसाधू राजानं ज्ञापयामास। देव, पद्मावत्याः सर्वाभरणसमेतश्चौरोऽयं प्राप्तः । राजा च तस्य शिरच्छेत्तुमादिदेश। अथ वज्रमुकुटो वदति । देव, नाहं चौरः । किन्तु योगिनोऽलङ्कारविक्रयं करोमि । स योगी श्मशाने विद्यते। किन्तु विनापराधेन मयि हते सति भवतो महानधर्मो भविष्यति राज्यनाशश्च । किन्तु मद्वचनं सत्यं नवेति श्मशानं गत्वा योगिनं पृच्छ । स यद्येतन्नाङ्गीकरोति तदा चौरफलं दास्यसि ।

ततो राजाज्ञया समानीय स योगी पृष्टो ब्रूते । देव, ममैव धनमेतत् । एतद् विक्रेतुमयं मया प्रयत्नेन प्रस्थापितः । तच्छ्रुत्वा राजा वदति । किमहो पद्मावत्याभरणामिदं भवता कुत्र प्राप्तम् । योगी वदति । देव, मय्यत्रावस्थिते कृष्णचतुर्दशीरात्रौ सर्वालङ्कारभूषिता मृतनृपबालककृताशना कन्या रूपयौवनसम्पन्ना डाकिनीवेषधारिण्य-

लङ्कारं श्मशाने स्थापयित्वा मस्तके सन्धानं वहति । तां नृप पुत्रखादिनीमवलोक्य लोहशलाकया दक्षिणोरौ रेखात्रयं चिह्नं दत्वा सकलरत्नाभरणं मयानीतम् । तद्यस्याभरणमिदं तस्या दक्षिणोरौ रेखात्रयमवलोकयतु देव ।

ततो योगिनो वचनेन समधिगततत्त्वो राजा पुत्रमरणाभिरोषे पद्मावतीं डाकिनीं निश्चित्य हन्तुमुद्यतोऽभवत् । ततो योगी राजानं वदति । देव, भवान् महामहो स्त्रीवधं न करिष्यति । विशेषतश्च समाधिदृष्टया मया ज्ञातम् । अस्याः पापिष्ठायाः शोणिताश्रुपातं यत्र भवति तत्राचिरेणैवाकल्याणं भवति । ततो भवता प्रतीत्यारण्यं निर्वा-स्यतामिति । ततः स राजा योगिनो वचनमकार्षीत् । ततः पद्मावती-मादाय युवराजादयः स्वदेशं गतवन्तः । ततः पद्मावत्याः शोकेन सान्धिविग्रहिको दन्ताघातः सपत्नीकः परलोकमगात् ।

वद राजन् । तस्य सभार्यस्य वधः कुत्र भविष्यति । राजा वदति । शृणु रे वेताल । असम्यग्विचारणया तस्य सपत्नीकस्य वधो राजनि कर्णोत्पले भवति । नृपताविति वादिनि स वेतालः शिंशपावृक्षे पुनर्ललाग ।

इति प्रथमो वेतालकथाप्रबन्धः

[द्वितीया कथा ।]

ततः पुनरानीयमानो वेतालः कथामपरां कथयति ।

आसीत् कालिन्दीकूले ब्रह्मपुरनामधेयं नगरम् । तत्राग्निस्वामी नाम ब्राह्मणः प्रतिवसति । तस्य मन्दारवती नाम कन्या विद्यते । तां त्रैलोक्यसुन्दरीमवलोक्य त्रयो ब्राह्मणकुमारास्तस्याः पाणिग्रहण-चिकीर्षवोऽग्निस्वामिनमभ्यर्थयन्ति । अग्निस्वामिनोक्तम् । यूयं रूपवन्तो

धनवन्तो महाकूलप्रसूता विख्यातवीर्या भवन्तः। एका कन्या कस्मै देयेति। एकेनोक्तम्। मह्यमियं दीयताम्। अपरेणोक्तम्। यदीयमेकस्मै कन्या दीयते तदापरौ द्विजपुत्रौ जीवनं त्यक्ष्यतः। तदा भवतो वधभागिता भवेत्। अग्निस्वामी च ब्रह्मवधभयात् कस्मैचिद् ब्राह्मणाय न ददाति।

इत्येव काले विधिवशान्मन्दारवती परलोकमगात्। अथ तस्यां दग्धायामेको ब्राह्मणस्तच्चिताभस्मना निजदेहं विलिप्य सन्तापेन जटावल्कलधारी देशान्तरं गतः। अपरो ब्राह्मणस्तस्या अस्थीनि गृहीत्वा नानातीर्थं जगाम। अपरो ब्राह्मणस्तस्याश्चिताभस्मनि गृहं कृत्वा तत्रैव परिहृतसुखस्तस्थौ। अथ जटाधरो ब्राह्मणो भ्राम्यं रुद्रशर्मणो ब्राह्मणस्य गृहं भोजनार्थी गतः। ततो रुद्रशर्मणा ब्राह्मणी निगदिता। ब्राह्मणि, ब्राह्मणाय महात्मनेऽन्नं देहि। ततो रन्धनसमये ब्राह्मण्या क्रन्दन् कुमारोऽग्नौ प्रक्षिप्तः। तं शिशुं मृतमवलोक्यान्नं विहाय जटाधरो गन्तुमुद्यतोऽभवत्। तं गच्छन्तमवलोक्य रुद्रशर्मा सिद्धिमन्त्रेण तं पुत्रमजीजिवत्। तं पुत्रं दर्शयित्वानेन गच्छ जटाधरः समानीतः। ततो जटाधरोऽन्नं खादित्वा तस्य रुद्रशर्मणः पुस्तकमपहृत्य मन्दारवतीचितास्थानमागतः। अपरो नानातीर्थेऽस्थि स्नापयित्वा तत्रैवागतः। अपरश्चितारक्षकस्तत्रैवास्ते। अथ द्वयोः स्थानाद् भस्मास्थिनी गृहीत्वा भस्मनास्थ्ना च मन्दारवतीं मूर्तिमयीं कृत्वा पुस्तकमन्त्रेण जटाधरस्तां जीवितवान्। तां प्राप्तजीवनामवलोक्य सर्वेऽस्याः पाणिग्रहणचिकीर्षवोऽन्योन्यं कलहायन्ते।

वेतालो वदति। वद राजन्। अस्याः पतिर्धर्मार्थतः को भवति। मौनपरायणोऽपि राजा धर्मं विचिन्त्य तस्य सन्देहच्छेदं कर्तुं ब्रूते। शृणु रे वेताल। मन्त्रवान् ब्राह्मणस्तस्याः पिता भवति स्रष्टृत्वात्। अस्थिस्नापकस्तीर्थपूतोऽस्याः पुत्रो भवति परलोकसौहृद्यत्वात्। चिता-

भस्मरक्षकस्तस्याः पतिर्भवत्यपेक्षकत्वात् । नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग ।

इति द्वितीयो वेतालकथाप्रबन्धः ।

[तृतीया कथा ।]

नृपोऽपि सत्वरं गत्वा पादपादवतार्य तं ।
स्कन्धे पुनः समारोप्य श्मशानं पुनराययौ ॥ १ ॥

नीयमानो महीपालं कुणपः पुनरब्रवीत् ।
हर्षेण शृणु राजेन्द्र शुकसारिकयोः कथाम् ॥ २ ॥

अस्ति भागीरथीपरिसरे सकलमहीमण्डलालङ्कारभूषितं पाटलीपुत्रनाम नगरम् । तत्र सकलगुणसम्पन्नो विक्रमकेसरी राजा बभूव । पराक्रमकेसरी नाम तस्य पुत्रोऽभवत् । स तु सकलकलासम्पन्नो विद्वान् धार्मिको राजलक्षणक्षमो युवराजः । तस्य युवराजस्य सर्वशास्त्रपारदर्शी भूतभविष्यद्वर्तमानकालत्रितयाभिज्ञो विदग्धाभिधानः पञ्जरस्थः क्रीडाशुकस्तस्थौ । एकदा स च पराक्रमकेसरी शयनागारे रहसि विश्रम्भकथाकेलिपरिहाससमये शुकं पप्रच्छ । भोः शुक, विदग्धसुतस्त्वामिति किं जानासि का मे प्रिया भविष्यति यया सह क्रीडानिर्भरसुरतसम्भोगसुखेन दिवसान्नेष्यामि । श्रुत्वा शुकेनोक्तम् । युवराज, मगधाधिपतेश्चन्द्रावलोकस्य राज्ञः सुता चन्द्रप्रभानाम्नी धर्मपत्नी ते भविष्यति । तया रूपयौवनसम्पन्नया सह सकलमनोरथसुरतसम्भोगसुखमनुभूय जन्म सफलं करिष्यति भवान् । किं तु तस्याश्चन्द्रप्रभायाः क्रीडापरा सौधर्मिकानाम्नी सकलगुणसम्पन्ना सारिकैका विद्यते । सापि तथैव युवती मधुरवाक्यभाषिणी । अत एव

निगद्यते। अनुरूपसंयोगरसिकेन विश्वसृजा तथा रचितं, यथा सा तथा सारिका। इत्युक्त्वा विरराम।

अथ कियता कालेन दैवघटनया मगधेश्वरः पराक्रमकेसरिणे चन्द्रप्रभां विवाहेन प्रादात्। युवराजस्तां स्वदेशे समानीय पितुः समादेशादनुदिनं राजचर्चां विधाय रात्रौ प्रियतमया चन्द्रप्रभया समं सुरतसम्भोगेन कालं नयन्नवतिष्ठते। युवराजस्य क्रीडाशुको यत्र शयनागारे सुवर्णपञ्जरस्थोऽपि विद्यते तत्रैव सुवर्णमयी सारिका विदग्धा चन्द्रप्रभया रक्षिता।

एकदा युवराजश्चन्द्रप्रभया सह सुरतसम्भोगं भुक्त्वायासेन दम्पती निद्रां गतौ। एतस्मिन् समये शुकेन सारिका प्रोक्ता। प्रिये सारिके, भजस्व माम्। श्रुत्वा सारिका शुकमभ्यधावत। अरे पुरुषाः कृतघ्नाः कठिनहृदयाः। सर्वथा पुरुषसमागमो न मे रोचते। कथमेवं वदसि। श्रुत्वैतच्छुकः क्रोधपरो ब्रूते। पापिष्ठे, कथमिदं वदसि। अहमिति जानामि, स्त्रियः कृतघ्नाः पापीयस्यः, सर्वथा स्त्रीणां सङ्गो न विधिः। इत्यन्योन्यविरोधे युवराजो जजागार। शुकं पृच्छति। शुक, किं ब्रूषे। शुकः स्वकीयवचनं सारिकावचनं च कथितवान्। युवराज भवानस्य वचनस्य संशयच्छेदं करोतु। तदा पराक्रमकेसरी प्राह। सारिके त्वं ब्रूहि। केन कृतघ्नाः पुरुषाः। सारिका सविशेषं कथयति। शृणु युवराज, येन कृतघ्नाः पुरुषाः।

मध्यदेशे मदयन्ती नाम नगरी समासीत्। तस्यां महाधन-सम्पन्नः सकलवणिजां मुख्यतमो गन्धदत्तो नाम वणिक् प्रतिवसति। तस्य पुत्रो धनदत्तोऽभूत्। सर्वस्वं पितुर्द्यूतेन नष्टं कृत्वा देशान्तरम-करोत्। ततः स धनदत्त इतस्ततः परिभ्रमंश्चन्दनपुरनिवासिनो दयायुक्तस्य हिरण्यगुप्तस्य गृहमागतः। तं तथाविधमवलोक्य स तं पप्रच्छ। को भवान् किमर्थमत्रागतोऽसि। पृष्टो वृत्तान्तमखिलमे-

वायमब्रवीत् । तच्छ्रुत्वा तेनापुत्रेण हिरण्यगुप्तेन रत्नावती नाम कन्या तस्मै विवाहेन दत्ता । तत्र तया सममसौ धनदत्तो विविधसुख-मनुभवंस्तिष्ठति । अथ कियति काले गते श्वशुरमब्रवीत् । तात, आज्ञापय स्वदेशं गच्छामि । श्रुत्वैतत् स हिरण्यगुप्तो हर्षेण विविध-रत्नानि दासीद्वयं दत्वा दुहितरं प्रस्थापयामास । स द्यूतविनष्टसर्व-स्वो रत्नावत्या सालङ्कारया स्वदेशं गच्छन् गहनाटवीं प्रविवेश । तत्र कूपमेकमासाद्य तां पतिव्रतां निहत्य सर्वालङ्कारमादाय स पापिष्टोऽभिलषितस्वदेशं जगाम । ततो रत्नावती परमायुवशात् कथमपि जीवितवती । सख्यौ मृतवत्यौ । अनन्तरं विधिवशाद् बहवोऽध्व-नीनास्तृष्णार्ताः कूपसमीपमागत्य तामालोक्य विस्मिताः पप्रच्छुः । पृष्टा ब्रूते । पितरो धर्मशीलाः अस्मिन्नरण्ये चौरेण ममाभरणं गृही-त्वा मामपि निहत्य गतम् । तद्भयान्मे पतिः कुत्र गत इति न ज्ञायते । तस्मान्मां चन्दनपुरं प्रापय । तेऽपि सर्वे चन्दनपुरं व्यव-सायार्थं गच्छन्ति । एतेनाधिकस्नेहेन सा तत्र नीता । स हिरण्य-गुप्तस्तथाविधां दुहितरमवलोक्य विस्मितोऽब्रवीत् । पुत्रि किमेतत् । पृष्टा सा साध्वी चौरस्य दोषं निगदितवती, न तु पापात्मकस्य भर्तुः । ततः पिता ये रत्नावतीमानीतवन्तस्तान् सर्वानशेषताम्बूलवस्त्राणि दत्वा प्रेषयामास । रत्नावती च पतिं ध्यात्वा भृशमवतिष्ठते स्म ।

अथ कियता कालेन धनदत्तोऽपरधनापहरणशीलः पुनराजगाम । तमायातमालोक्य हिरण्यगुप्तो हृष्टो बभूव । इत्येव काले रत्नावती-मालोक्य कृतदोषोऽयं पापिष्ठो महान् त्रस्तोऽभूत् । रत्नावती ब्रूते । प्राणेश्वर, त्वमशङ्को भव । मया प्राप्तजीवनया पितुः स्थाने भवतो कश्चिद्दोषो नाभिहितः किं तु चौरस्य । पथिकैरहमानीता त्वामेव ध्यायन्ती तिष्ठामि । पुण्येन मया पुनर्भवान् प्राप्तः । तच्छ्रुत्वा हर्षितस्तत्र रत्नावत्या सह नानासुखमनुभवंस्तिष्ठति । अथैकदा रति-

श्रमेण निद्रां गतायां रत्नावत्याः सर्वाभरणमादाय पुनर्द्यूतलुब्धोऽयं पापिष्ठः पलायितः ।

ततः सा रत्नावती धनदत्ताधीनजीवना हा प्राणेश्वरेति कृत्वा जीवनं तत्याज । पुरुषकथा मया कथिता ।]

तच्छ्रुत्वा पराक्रमकेसरी शुकमवोचत् । शुक, त्वमपि स्त्रीदूषणं कथय । पृष्टः कथयति सः ।

[शृणु देव । दक्षिणस्यां दिश्यपूर्वहर्षवती नाम नगरी । तस्यां धर्मबलो नाम राजा बभूव । तस्य राज्ञः प्रियतमो वसुदत्तो वणिगभूत्। वसुदत्तस्य त्रैलोक्यमोहिनी तनया वसुमती नामाभवत् । वसुदत्तस्तां कन्यां ताम्रलिप्तिकानामनगरीश्वराय समुद्रदत्ताय विवाहेन दत्तवान्। तां विवाहयित्वा समुद्रदत्तः स्वदेशमगमत् । सा कन्या पितृगृहे स्थिता । अथेयमेव तन्नगरवासिनं द्विजपुत्रमतिमनोहरमवलोक्य प्रियसखीं प्रस्थाप्य समानीय मासाभ्यन्तरे तेन सममशेषसुखमनुभवन्ती तिष्ठति । अथ कियता कालेन निजपतिरस्याः समुद्रदत्तः समायातः । वसुदत्तस्तस्यातिथ्यं विधाय रात्रौ दिव्यमन्दिरे शयितुं जामातरमादिदेश । वसुमती च तत्रैव प्रस्थापिता ।

तस्यामेव रात्रौ चौरेण मनसि चिन्तितम् । रतिक्रीडाश्रमेणायं समुद्रदत्तः सभार्यो निद्रां यास्यति । तदाहमेव सर्वस्वं सुखेन नेष्यामि । इत्यालोच्य तत्र गत्वा सिद्धिं दत्त्वा प्रदीपच्छायायां स्थितः । स समुद्रदत्तः श्रमेण किञ्चिन्न बुबोध । सा द्विजकुमारं स्मृत्वासुखिनी भूत्वा तस्थौ । ततो निद्रागतसमुद्रदत्तमवलोक्य कामविह्वला सा कोपाद् गन्तुमुपचक्रमे । इत्येवकाले भयाद् दूत्या द्विजकुमारागमनं वसुमत्यामभिहितम् । सापि ब्रूते । दूति, त्वं ममालङ्कारभूषितात्र तिष्ठ यावदहं द्विजकुमारं संभाष्य समागच्छामि । दूत्या तथा कृते वसुमती सङ्केतस्थानं जगाम । विधिवशाच्चौरोऽयमिति कृत्वा स

द्विजकुमारः द्वारिकेण महाकाण्डहतः कथमपि सङ्केतस्थानं गत्वा पतितः । वसुमती द्विजकुमारं तथाविधमवलोक्य तस्य मुखे मुखं दत्त्वा विलपन्ती तस्थौ । इत्येव काले द्विजमुखे विधिवशात्तस्या नासिका प्रविष्टा । अतोऽचैतन्यान्मरणसमये दन्ताघातेन तस्या नासिकां चिच्छेद । ततो गतनासिका वसुमती विचिन्त्य मृतं तं विहाय पत्युः शय्यामागत्य दूत्यां वृत्तान्तमभिहितवती । दूती वदति । वसुमति, निर्बुद्धिर्मा भव । मद्वचनमाचर । पितुः स्थानं गत्वा समुद्रदत्तस्य दोषमाख्यापय । तदा वसुमती सखीसमेता क्रन्दन्ती पितृसमीपं गत्वा भर्तुर्मिथ्यापवादमभिहितवती ।

चौरश्च वसुमत्याः समुद्रदत्तस्य च चरितं दृष्ट्वा श्रुत्वा च गतवान् । वसुदत्तस्तां कन्यां विनासां विलपन्तीमवलोक्योवाच । पुत्रि, किमेतत् । इति पृष्टा लज्जया किञ्चिन्न वदति । तदैषा पापिष्ठा स्फुटभाषिणी सखी ब्रूते । प्रभो, भवतो दुहिता परिहासपरायणस्य समुद्रदत्तस्य लज्जया किञ्चिदुत्तरं न दत्तवती । एतावतापराधेनास्या नासिकां चिच्छेद । रहस्यमेतच्छ्रुत्वा वसुदत्तः कोपाद्राजानं ज्ञापयामास । ततोऽतिक्रुद्धेन राज्ञा समुद्रदत्तस्य शिरश्छेत्तुमाज्ञा विहिता ।

एतावति समये दयालुश्चौरः सर्ववृत्तान्तदर्शी दण्डवत्प्रणामानाचर्य वदति । देव, नायं वध्यः । राजाह । कथं न वध्यः । तदास्य प्राणरक्षार्थमात्मनश्चौर्यमुपदर्श्य सर्ववृत्तान्तं राज्ञे निवेदयामास । तदावगततत्त्वो राजा वसुदत्तं प्रियतममभ्यधात् । सखे, भवतो दुहितातीवाकार्यकारिणी । तस्मादियं निर्वास्यतामिति । वसुमतीं निर्वास्य दूत्याश्चोचितफलं दत्त्वा चौरं नगरमण्डलं कृत्वा समुद्रदत्तो बहुतरं रत्नं दत्वा स्वदेशाय प्रस्थापितः । देव, मया स्त्रीदूषणमेवं कथितम् ।

स पराक्रमकेसरी तयोः कलहनिर्णयाक्षम इवासीत् ।]

अथ वेतालो राजानं पप्रच्छ । राजन् ब्रूहि । स्त्रीपुरुषयोर्मध्ये किं पुरुषाः कृतघ्नाः, किं स्त्रियः कृतघ्नाः । श्रुत्वा राजोवाच । शृणु रे वेताल । लघुचित्ताः स्त्रियः सकलपापानां भाजनमिति कृत्वा विश्वसृजा निर्मिताः । पुरुषेषु कश्चित् क्रूरस्तिष्ठति । स्त्रियः स्वभावतः क्रूराः पापकारिण्यो भवन्ति ।

इति राज्ञा परिच्छिन्नं कृत्वा संशयमुत्तमम् ।
मौनभङ्गं विधायास्य जगाम स पुनर्द्रुमम् ॥ ५ ॥

इति जम्भालदत्तविरचितस्तृतीयो वेतालकथाप्रबन्धः । Mm 221.

[चतुर्थी कथा ।]

ततो राजा समालोक्य स्कन्धं शून्यं परासुना ।
पश्चाद् वृक्षतलं गत्वा शवं स्कन्धे चकार ह ॥ ६ ॥

तथैव शवमादाय श्मशानं गन्तुमुद्यतः ।
स्कन्धारूढः स वेतालो राजानं पुनरब्रवीत् ॥ ७ ॥

अवधानं विधेहि त्वं राजन् सत्त्वपरायण ।
विचित्रां विविधां रम्यां कथां कथयतो मम ॥ ८ ॥

अस्मिन्महीमण्डले सकलराजलक्षणोपेतो राजा सार्वभौमः शूद्रको नाम समासीत् । एकदामात्यगणपरिवृतस्य परिषदमवस्थितस्य राज्ञः पुरद्वारि देशान्तरादागत एको राजपुत्रः पुत्रभार्यासमेतो- वर्तनार्थी दूरादेव दक्षिणापथसकाशात् समागत्य दौवारिकमब्रवीत् । भो दौवारिक, मामवेहि । राजपुत्रोऽहं पुत्रभार्यासहायः शूद्रकमहाराजस्य यशः श्रुत्वा वर्तनार्थी समागत्य तिष्ठामि । मम वृत्तान्तं राजनि विज्ञापय ।

श्रुत्वैतत् प्रतीहारो राजानं विज्ञाप्य दौवारिकेणानीयमानं तमालोक्य राजा पप्रच्छ । को भवान् । किमर्थमिहागत्य मिलितः । इति पृष्टो ब्रूते । देव, वीरवरनामा क्षत्रियोऽहम् । सेवाकांक्षी समागत्य तिष्ठामि । राजा वदति । किं जीवनं कर्तव्यं तद्वद । वीरवरेणोक्तम् । प्रत्यहं सुवर्णशतपञ्चत्रयं ददातु देव । राजाब्रवीत् । अत्रानेकगुणवन्तः सन्ति । केषामप्येतावज्जीवनं न विद्यते । तच्छ्रुत्वा वीरवरो नृपतिमभिनन्द्य चलितः । ततः सान्धिविग्रहिकेणोक्तम् । देव, एतेन कातरो न स्याद्यद्दिवसकतिपयं यावदेतावज्जीवनं दत्वा वीरवरस्य भाजनता परीक्ष्यताम् । धनमपि विनष्टं न भविष्यति । ततो राज्ञा पुनरानीय तस्मै स्थानं यथाभिलषितवर्तनं दत्वा प्रस्थापितोऽयं वीरवरो वर्तनधनस्यार्धं ब्राह्मणेभ्यो दत्वा चतुर्थांशमबन्धुपङ्गुजनेभ्यो दत्वा चतुर्थांशेनात्मानं वर्धयति । एवं राजसेवां कुर्वन्नास्ते ।

अथैकदा दक्षिणस्यां दिशि रात्रावेका स्त्री करुणस्वरेण रोदिति । तच्छ्रुत्वा राजा वदति । दौवारिकस्तिष्ठति । वीरवरेणोक्तम् । देव, अहमस्मि । नृपेणोक्तम् । वीरवर, का रोदिति । तां निश्चित्य मां ज्ञापय । ततोऽयं गतः । राजा च तस्य वर्तनतत्त्वमेव ज्ञातुमनुपलक्षितो जगाम । वीरवरस्तत्र गत्वा रुदतीमालोक्याब्रवीत् । मातर्भगवति, किमर्थमेकाकिनी रोदिषि । सा तु यत्नेन पृष्टा ब्रूते । वत्स, अहं शूद्रकस्य लक्ष्मीः । स महात्मा प्रातःकाले नाशं गमिष्यति । तदहमिदानीं कुत्र स्थास्यामीति रोदिमि । तच्छ्रुत्वा वीरवरेणोक्तं । मातर्भवती यथा चिरस्थायिनी राजा च चिरजीवी भवति तदुपायं वदतु भवती । अहं तावत् करोमि । लक्ष्मीर्ब्रूते । वत्स तद्दुष्करं कर्म कः करिष्यति । वीरवरेणोक्तम् । मयाशक्यमपि कर्तव्यमिति वदतु भवती । लक्ष्मीर्ब्रूते । द्वात्रिंशल्लक्षणोपेतं पुत्रं समानीय तन्मातृभगिन्यौ तच्चरणौ दधाते स्वेच्छया, स्वयमपि स्वेच्छया पिता कात्यायन्यै बलिं

ददाति, तदा राज्ञः शोभनं भवति। पुत्रोऽपि यदि केशकर्षणशिरश्छेदं स्वीकरोति तदैव नान्यथा। इति निगद्यान्तर्हिता बभूव। राजा सर्वं श्रुत्वा तदनुसरणं करोति।

वीरवरश्च सहसा स्वगृहं गत्वा पत्न्यां पुत्रे दुहितरि च सर्वमकथयत् प्राबोधयच्च। तच्छ्रुत्वा पत्नी वदति। यदेतद्दुष्करं कर्म न कर्तव्यं तदा परलोके निस्तारः कथं भविष्यति। तत्पुत्रः शक्तिवरो ब्रूते। तात धन्योऽहं यन्मरणे राजा चिरजीवी राज्यस्य निस्तारो भविष्यति दुहिता चाभिनन्दिता। राजा सुगुप्तः सर्वं श्रुत्वानुपलक्षितास्तिष्ठति।

वीरवरः सपरिवारस्तत्र गत्वा तेनैव विधिना राज्ञो विपत्तिक्षयहेतवे स्वपुत्रं भगवत्यै बलिं दत्वा तच्छोकं परिहरन् राज्ञो दीर्घायुष्ट्वकामस्तेन खड्गेनात्मनः शिरश्चिच्छेद। गुरुतरशोकेन वीरवरपत्नी दुहिता च राज्ञो दीर्घायुष्ट्वकामा स्वशिरश्चिच्छेद। राजा सर्वमेतदवलोक्य सपरिवारवीरवरस्य सात्त्विकत्वमाधिगम्य स्वशिरश्छेत्तुमुपचक्रमे। एतावति समय आकाशवाणी बभूव। राजन्, त्वमात्मबलिं न दास्यसि। तव कात्यायनी प्रसन्नाभवत्। राजा वदति। मातर्यद्येतत् स्यात्तदा वीरवरो सपरिवारो जीवतु। वीरवरे सपरिवारे जीविते राजाऽनुपलक्षितः सहसा स्वगृहमागतः।

प्राप्तजीवनो वीरवरः पत्नीं पुत्रं दुहितरं स्वगृहं संस्थाप्य नृपद्वारमागतः। तमायातमालोक्य राजा वदति। वीरवर, कुत्र गत्वा स्थितं भवता। का रोदिति। इति रहस्यं कथय। इति पृष्टो ब्रूते। देव, एका स्त्री दुःखिनी रोदिति। तां निस्सार्यागतोऽस्मि। राज्ञोक्तम्। वत्स, स्वगृहं गच्छ। अथापरदिने राजा सर्वामात्यान् समानीय वीरवरस्य सपरिवारस्य सात्त्विकत्वं निगदितवान्। ततः सर्वे विस्मिता बभूवुः। तदा वीरवरप्रसादाद्राजा सार्वभौमो बभूव। वीरवराय बहुतरहयहस्तिधनजनमणिरत्नानि दत्वा शेखरदेशे स राजा कृतः।

वद राजन् वीरवरशूद्रकयोर्मध्ये को महान्महासत्त्वः । राजा वदति । शृणु रे वेताल । सेवकानामयमेव धर्मः यत् प्रभुकार्ये प्राणांस्त्यजन्ति । किं तु शूद्रको नृपतिर्महान्महासत्त्वः यदेवंविधसाहसेन सेवकं परिवारसहितं जीवयित्वा राजानं कृतवान् । नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्लेलाग ।

इति चतुर्थो वेतालकथाप्रबन्धः ।

[पञ्चमी कथा ।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति ।

देव, चम्पावती नाम नगरी पुरासीत् । तत्र विष्णुशर्मा नाम ब्राह्मणः प्रतिवसति । तस्य त्रयः पुत्रा बभूवुः । अथैकदा तेन यज्ञार्थं कूर्ममानेतुं पुत्राः प्रस्थापिताः । गत्वा तैः कूर्मोऽपि प्राप्तः । एको ब्रूते । त्वमेनं गृहाण । अहं भोजनचङ्गः । कथमहं नयिष्यामि । अपरो ब्रूते । अहमेव नारीचङ्गः । कथमहं नयामि । अपरो ब्रूते । अहं शय्याचङ्गः । कथमिमं नयामि । इत्यन्योन्यं कलहायमानाः पुण्यसेननृपतेः स्थानं गत्वा ज्ञापयामासुः । ततो राजा तान् समाश्वास्य तन्निर्णयं कुर्वाणो भोजनचङ्गस्य रन्धनार्थं सूपकारमादिदेश । अथ सूपकारेऽन्नं नयति भोजनचङ्गो वदति । श्मशानसमीपस्थलस्य धान्यस्येदं मया न भोक्तव्यम् । इत्युत्थाय चलितः । अथ नारीचङ्गस्य स्थाने नानालङ्कारभूषिता वराङ्गना प्रस्थापिता । तामायातामालोक्य नारीचङ्गो वदति । एषा छागगन्धात्रागत्य मां किमर्थं कदर्थयति । नासां धृत्वा कथमपि तस्थौ । शय्याचङ्गो दिव्यशय्यायां सुप्त्वा प्रातर्वदति । दुर्गतायां शय्यायां केशसहितायां सुप्त्वा मम गात्रं रक्तवर्णं जातम् ।

अथापरदिने राजा सूपकारमादिदेश। का वार्ता। तेनोक्तम्। देव, सत्यं भोजनचङ्गः। तन्नीयमानमन्नं श्मशानभूमिजमिति निन्दति। तत्कार्ण्यं श्रुत्वा वराङ्गनां प्राह। वराङ्गना पृष्टा ब्रूते। देव, कुमारो मां छागगन्धां निन्दति। राज्ञोक्तम्। कथं त्वयि छागगन्धः। इति पृष्टा ब्रूते। देव, मम मातरि मृतायां मत्पिता मां छागदुग्धेनाजीवयत्। तस्मात् सत्यमेवायं नारीचङ्गः। शय्याचङ्गस्य पृष्ठे चिह्नं दृष्ट्वा ब्रूते। सत्यमयं शय्याचङ्गः। ततस्तेन राज्ञा त्रय एव द्विजपुत्रा भूषयित्वा स्वदेशं प्रस्थापिताः।

वद राजन्। एषां मध्ये को महान्। राजा वदति। शृणु रे वेताल। शय्याचङ्गो महान्। नृपताविति वादिनि वेतालः शिंशपा-वृक्षे पुनर्ललाग।

इति राज्ञः परिच्छेदं विज्ञाय जगतीपतेः।
व्यक्तवाचमघं कृत्वा शिंशपां कुणपो गतः॥ (१)

इति पञ्चमो वेतालकथाप्रबन्धः।

[षष्ठी कथा।]

अथ पुना राज्ञानीयमानो वेतालः कथामपरां कथयति।

देव, उज्जयिन्यां नगर्यां सुदर्शनो नाम नृपतिरासीत्। तस्य राज्ये हरिस्वामी नाम ब्राह्मणः सकलगुणसम्पन्नस्तस्थौ। तस्य सोम-प्रभा नाम कन्याभवत्। सा रूपयौवनवती पितरमब्रवीत्। तात, ज्ञानिविज्ञानिशूराणां मध्य एकस्मै विवाहेन दास्यथ। हसन् हरि-स्वामी तद्वचनमङ्गीकृतवान्। ततस्तया माताभ्रात्रोरपि तद्वचनमङ्गी-कारितम्। इत्येव काले चतुरङ्गसेनो नाम नरपतिः सुदर्शनं जेतुकाम

आजगाम । तदा सुदर्शनः पात्रामात्यैः समालोच्य तस्य बलवतः प्रीतये विचक्षणं हरिस्वामिनं बहुतरसम्भारं दत्वा प्रस्थापितवान् । ततः सम्भारं प्राप्य हरिस्वामिनो वचनामृतेन तृप्तश्चतुरङ्गसेनः स्वदेशमगमत् । तदानीमेको द्विजकुमारो हरिस्वामिनमब्रवीत् । तात, सोमप्रभा कन्या ते मम विवाहेन दीयताम् । तदा हरिस्वामी कन्याभिमतं तमब्रवीत् । तदवगम्य द्विजपुत्रेणोक्तम् । तात, अहं महाज्ञानीत्यात्मनो ज्ञानित्वमुपदर्श्य हरिस्वामिनो जामातृत्वमुपलभ्य विवाहसामग्रीमानेतुं जगाम । हरिस्वामी च राजस्थानं गच्छन्नास्ते ।

तस्मिन्नेव समयेऽस्य पुत्रं देवस्वामिनं सोमप्रभापाणिग्रहणमपरद्विजकुमारो ययाचे । तदासौ भगिनीसमुदीरितवचनं निजगाद । स तच्छ्रुत्वात्मनो विज्ञानित्वमुपदर्शितवान् । देवस्वामिनः स्वीकारमासाद्य विवाहसामग्रीमानेतुमगात् । तस्मिन्नेव समये हरिस्वामिनो ब्राह्मण्याः स्थानेऽपरो द्विजकुमारः सोमप्रभापाणिग्रहणं ययाचे । तदेयं दुहितुरुदीरितवचनं निगदितवती । तच्छ्रुत्वायं वदति । मातरहं महाशूर इत्यात्मनः शूरत्वमुपदर्शयामास । कन्याया मातुः स्वीकारमासाद्य विवाहसामग्रीमानेतुं गतः । अथ हरिस्वामी चतुरङ्गसेनस्य वृत्तान्तं सुदर्शने नृपतौ कथयित्वा हर्षाद्राज्ञः प्रसादं प्राप्य स्वगृहमागतः ।

अथैकदा त्रय एव द्विजपुत्राः ससामग्रीकाः सोमप्रभापाणिग्रहणचिकीर्षवो हरिस्वामिनो गृहमागत्य मिलिताः । तदानीं हरिस्वामी सोमप्रभां न पश्यति । तस्य च पत्नी तामनालोक्य रोदिति । देवस्वामिनापि सा नावलोकिता । ततो हरिस्वामी सपरिवारो विलपंस्तिष्ठति । तदा ज्ञानी वदति । हरिस्वामिन्, मा क्रन्द । तव कन्यां धूम्रनामा राक्षसो नीत्वास्ते विन्ध्याटव्याम् । तच्छ्रुत्वा विज्ञानी वदति । रथमहं करिष्यामि, यथा विन्ध्याटवीमवलंघ्य सहसा तेन रथेन

जित्वा तामानेष्यामि। तदा शूरो वदति। तात, राक्षसं जेतुमहं समर्थः। इति तथा कृत्वा रथारूढो राक्षसं विजित्य सोमप्रभां जित्वा शूरो हरिस्वामिनो गृहमाजगाम। तमायातमालोक्य पाणिग्रहणचिकीर्षवोऽन्योन्यं कलहायन्ते। हरिस्वामी च सर्वान् कृतोपकारानवलोक्य विस्मितस्तस्थौ।

वद राजन्। सोमप्रभा कस्य पत्नी भवति। राजा वदति। श्रृणु रे वेताल। सोमप्रभा शूरस्य पत्नी भवति। नेतरयोः। यतः पितुरङ्गीकारान्मातुरङ्गीकारो गरीयान्। राक्षसजित्त्वाच्च। ज्ञानिविज्ञानिनौ शूरस्य कार्यसिद्धये विधिना नियोज्य दत्तौ। इति प्रश्नच्छलेन नृपतेर्मौनमाहार्य वेतालः शिंशपावृक्षे पुनर्ललाग।

इति षष्ठो वेतालकथाप्रबन्धः।

[सप्तमी कथा।]

नृपप्रोक्तमिदं श्रुत्वा वेतालो विहसन् पुनः।
नृपस्कन्धाद् द्रुतं गत्वा शिंशपातरुमालगत्॥ १॥

पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, ताम्रलिप्तिका नाम नगरी पुरासीत्। तस्यां प्रचण्डसिंहो नाम राजा बभूव। तस्य राज्ञः प्रीतिभूमिः सत्त्वशीलो नाम कापालिकस्तस्थौ। अथैकदा तेन समं राजा मृगान्वेषणाय वनं प्रविवेश। अरण्ये भ्रमन् क्षुत्पिपासार्दितः श्रान्तः स नृपतिरासीत्। तदानीमयं सत्त्वशीलो राज्ञः क्षुत्पिपासोपशान्तये दिव्यामलकीफलयुगलं दत्तवान्। राजा तत् फलं खादित्वा तृष्णाक्षुद्विहीनः शान्तो बभूव। तदामलकीफलद्वयदानेन स कापालिकस्तस्य प्राणाधिकप्रियो बभूव। तदानेन सह

राजा सुखेन कालं नयमानस्तिष्ठति। अनन्तरं सिंहलद्वीपेश्वरो राज्ञः प्रचण्डसिंहस्य धैर्यमर्यादागाम्भीर्याणि श्रुत्वा कुवलयवतीं तनयां विवाहेन दातुमस्य स्थाने यानपात्रं दत्वा भद्रतरमनुष्यं प्रस्थापितवान्।

तदा कुवलयवतीसौन्दर्यनिरीक्षणार्थं सत्त्वशीलमयं राजा प्रचण्डसिंहः समादिदेश। ततस्तेन सिंहलद्वीपादागतेन सह सत्त्वशीलो गच्छन्नास्ते। एतावति समये वायुवेगेन वहित्रं जले निमग्नमभवत्। ततः सत्त्वशीलो जले संतरन् रत्नशैलशिखरमेकमपश्यत्। तत्रस्थां पार्वतीप्रतिमां पूजयित्वा निष्क्रामन्तीमेकां कन्यां त्रैलोक्यमोहनीयाकृतिं सखीसमेतामवलोक्य सत्त्वशीलः कामपीडितोऽभवत्। इत्येव काले तस्याः सखीं समायातामालोक्य सत्त्वशीलः स्वाभिमतमुवाच। तच्छ्रुत्वा सा ब्रूते। पुरुषवर, त्वमत्र तिष्ठ। गत्वाहं तवाभिमतं स्वामिन्यै निवेदयामि। गत्वा सर्वमभिहितम्। सा कन्या सखीमुखात् सत्त्वशीलाभिमतमाकर्ण्य हसन्ती सखीमादिदेश। सखि, गत्वा वद। ममाभ्यन्तरवर्तिसरोवरे स्नात्वा मत्समीपमायातु। ततो गत्वा सा तमब्रवीत्। हे पुरुषवर, मम स्वामिन्याः सरसि स्नात्वा त्वमागच्छ। ततोऽयमुल्लसितः सहसा सरसि निमज्ज्योत्थाय प्रचण्डसिंहस्य क्रीडावापीमागत्य तामेव ध्यायन् विलपंस्तिष्ठति। अथ प्रचण्डसिंहस्य पुरजनैस्तं सत्त्वशीलं तथाविधमवलोक्य राजनि निवेदितम्। देव, यः सत्त्वशीलः कुवलयवतीसौन्दर्यनिरीक्षणार्थं भवता प्रस्थापितः सोऽयमागत्य दीर्घिकातटे रोदिति। इति श्रुत्वा राजा विस्मितः सत्त्वशीलसमीपं गतः। दृष्ट्वा तमब्रवीत्। सखे किमेतत्। इति पृष्टो ब्रूते वृत्तान्तमामूलतः सर्वम्।

अथ तदवलोक्य हर्षेण राजा तेन सह वहित्रमारुह्य तत्रैवाजगाम। गत्वा च तामालोक्य राजापि कामपीडितोऽभवत्। साऽ-

पि प्रचण्डसिंहमवलोक्य कामार्दिताभवत् । अथ कथमपि बहुतर-मुपकरणं दत्वा सखीं प्रस्थाप्य नृपतेरातिथ्यं कृत्वा पश्चादपरां प्रस्थाप्य स्वाभिमतं निवेदितवती । तच्छ्रुत्वा राजा वदति । सखि, तव स्वामिनी मह्यमात्मानं दास्यति । गत्वा तद्वद । ततो गत्वेयं प्रचण्डसिंहस्य स्वाभिमतं स्वामिन्यै निवेदितवती । तच्छ्रुत्वा सा ब्रूते । गत्वा वदास्मै नृपतये । अहमात्मानं निवेदितवती । मयि राजा यथासुखमभिलषतु, स्वामिनीनिदेशात् सखी गत्वा तद्वचनं ज्ञापयामास । तदा राजा वदति । सा मत्समीपमायातु । ततः सा लावण्यवती सखीसमेता नृपतिसमीपमायाता । तामागतामालोक्य राजा ब्रूते । लावण्यवति, मह्यमात्मानं यदि भवती दत्तवती तदाहमपि सत्त्वशीलाय प्राणाधिकाय त्वां दत्तवान् । यदि मदीयवचनलङ्घनमाचरसि तदा दानभङ्गदोषेण त्वयि महापातकं भविष्यति । तदा सा कन्या दान-भङ्गदोषमपहर्तुमाह । तव या प्रीतिस्तामेव कुरु । ततो नृपतिनिदेशात् सा कन्या सत्त्वशीलमनुगता । सत्त्वशीलस्तया लावण्यवत्या सहाशेष-सुखमनुभवंस्तस्थौ । एतावति समये राजा सत्त्वशीलमवोचत् । तदा-मलकीफलद्वयदानेन लावण्यवती प्राप्ता भवता, अपरमपि पुण्यं भवतो भविष्यति । सत्वशीलो वदति । देव, तव प्रसादाद्वा किं न मम भविष्यति । अथ लावण्यवती सत्त्वशीलमब्रवीत् । भो स्वामिन् प्रचण्डसिंहो महाराजः स्वगृहं विहायास्ते । अयं तावन्महान् दोषः । अतोऽहं ब्रवीमि । । एतत्सरोवरे स्नात्वा स्वदेशं गच्छामः ।

राजन्, प्रचण्डसिंहसत्त्वशीलयोर्मध्ये को महासत्त्वः ।

राजा वदति । शृणु रे वेताल । राजा प्रचण्डसिंह एव महा-सत्त्वः । यतस्तदामलकीफलद्वयं स्मृत्वा कामपीडितोऽपि तां त्रैलो-क्यमोहिनीमस्मै प्रादात् । नृपताविति वादिनि वेतालः पुनः शिंशपा-वृक्षे ललाग ।

इति वदति महीपे मौनभङ्गं विहाय
कठिनचरित एष प्राद्रवद् वृक्षशाखां ।
अवसदथ सहर्षो घर्घरापारभाजि-
द्रुमतलमपि गत्वा तं पुनर्भूप एषः ॥ २ ॥

सविस्मयो भूमिपतिर्गृहीत्वा
स्कन्धप्रदेशे विनिवेश्य रात्रौ ।
ययौ परावृत्य महाबलं तं
सान्द्रान्धकारे पथि विक्रमार्कः ॥ ३ ॥

इति सप्तमो वेतालकथाप्रबन्धः ।

[अष्टमी कथा ।]

ततो गृहीत्वा कुणपं महीरुहात्
प्रवृद्धवेगेन व्रजन् महीपतिः ।
स तं समालोक्य नृपं कुतूहलात्
कथां विचित्रां पुनरेव भाषते ॥ १ ॥

अथ पुनरानीयमानो वेतालः प्रश्नान्तरमकार्षीत् ।

देव, आसीच्छोभावती नाम नगरी । तस्यां यक्षकेतुनामा राजा गौरीभक्तस्तस्थौ । तत्र देवी स्वयमधिष्ठानमकरोत् । तस्मिन्ना-नादिग्देशादागत्य लोका भगवतीमर्चयन्ति । स्त्रियः सर्वा नानाविध-मङ्गलं कुर्युः । अथैकदा शुद्धपटनाम्नो दुहिता मदनसुन्दरी सखी-जनपरिजनपरिवृता भगवतीं पूजयितुमाजगाम । एतस्मिन् समये तामालोक्य धवलो नाम राजकुमार एकः कामपीडितः पितरमब्रवीत् तात, यदि शुद्धपटनाम्नो नृपतेस्तनया मदनसुन्दरी मम भार्या

भवति तदाहं जीवामि । तच्छ्रुत्वा धवलस्य पिता शुद्धपटमब्रवीत् । राजंस्तव पुत्रीं मम पुत्राय देहि । तदा तेनोक्तम् । यं प्रति देवी प्रसीदति स तस्याः पतिर्भवति । तच्छ्रुत्वा धर्मवान् पुत्रमब्रवीत् । पुत्र, देवी यस्य प्रसन्ना भवति स तस्याः पतिर्भवति । इति रहस्यं श्रुत्वा महादेवीमाराधयितुमुपचक्रमे । स्तुत्वा च शिरश्छेत्तुमुपचक्रमे । तदा देवी प्रसन्ना तमुवाच । वत्स, मा साहसं कार्षीः । मदनसुन्दरी तव पत्नी भविष्यति । ततो लब्धवरप्रसादः स धवलो राजकुमारस्तस्याः पाणिग्रहणमाचर्य तया सह नानासुखमनुभवंस्तिष्ठति ।

अथैकदा शुद्धपटस्य पुत्रः श्वेतपटो मदनसुन्दरीं भगिनीं धवलं च भगिनीपतिमादाय पितुरादेशात् स्वदेशं गच्छन्नास्ते। इत्येव काले गौरीमण्डपमालोक्य धवलो वदति । श्वेतपट, त्वमत्र मदनसुन्दरीमादाय क्षणं तिष्ठ, यावदहं गौरीं प्रणम्यागच्छामि । इत्युक्त्वा गत्वा देवीं नत्वा दैवप्रेरितखड्गेन शिरश्छित्वा भगवत्यै धवलोऽदात् । क्षणमवलम्ब्य तमनागतमालोक्य श्वेतपटो गत्वा तथाविधं भगिनीपतिं दृष्ट्वा स्वशिरश्छित्वा भगवत्यै दत्तवान् । ततो मदनसुन्दरी पतिभ्रातरावनायाताववलोक्य गत्वा तत्र तौ विशिरस्कौ दृष्ट्वा गुरुशोकेन स्वशिरश्छेत्तुपमुचक्रमे । ततः प्रसन्ना देवी ब्रूते । पुत्रि, मा साहसं कार्षीः । तव प्रसन्नास्मि वरं वरय । मातर्यदि वरो देयस्तदा मत्पतिभ्रातराविमौ जीवेताम् । देवी वदति । सत्वरं स्कन्धे शिरो नियुज्यताम् । ततस्तया संभ्रमेण पतिस्कन्धे भ्रातुः शिरो भ्रातुः स्कन्धे पतिशिरो नियुज्य देवीवरप्रसादेन जीवयितौ । प्राप्तजीवनाविमौ दृष्ट्वा मदनसुन्दरी व्याकुलीभूता ।

वद राजन् । कस्तस्याः पतिर्भवतु को वा भ्राता । राजा वदति । शृणु रे वेताल । सर्वाङ्गाच्छिरः प्रधानं भवति । तस्माद्यत्र स्कन्धे पत्युः शिरो विद्यते स तस्याः पतिरपरो भ्राता ।

सम्बन्धसन्देहविभञ्जनं तदा
श्रुत्वा नरेन्द्रात् कुणपो प्रगल्भः
त्यक्त्वा नृपं वह्निमुखः प्रधावन्
वेगात् पुनः प्रेततरुं जगाम ॥ २ ॥

नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग ।

इत्यष्टमो वेतालकथाप्रबन्धः ।

[नवमी कथा ।]

पश्चान्नृपस्तत्र गतोऽतिवेगाद्
वृक्षादमुं चैव निपात्य पश्चात् ।
स्कन्धे पुनस्तं प्रविधाय गच्छन्
कथामपूर्वां कुणपं ययाचे ॥ १ ॥

वृत्तान्तं दुहितुरसीमवीरबाहोः
सोत्साहं नृप कथयामि मुञ्च कोपम् ।
सुमतिरसि नृपाणां श्रेष्ठ सत्त्वेन युक्तो
रचितरुचिरप्रश्नः श्रूयतां मन्मुखात् त्वम् ॥ २ ॥

अथ पुनरानीयमानो वेतालः कथामपरां विचित्रां कथयति ।

आसीच्छृङ्गारवती नाम नगरी । तत्र वीरबाहुनामा राजा भवति । तस्य पत्नी पद्मावती नाम । तस्यामनेन राज्ञा पुत्रैकः कन्यैका चोत्पादिता । सा कन्या नाम्नानङ्गवती । सानङ्गवत्येकदा पितरमब्रवीत् । तात, धैर्यगाम्भीर्यमर्यादान्विताय मां विवाहेन दास्यसि । तच्छ्रुत्वा दुहितुरुदीरितवचनमङ्गीकृतवान् राजा । अथैकदा विपुलाकृतयो गुणवन्तो धीराश्चत्वारो राजकुमारा अनङ्गवतीं विवाहयितुं

राजानमभ्यर्थयन्ति । एकः शूद्रसत्तमो ब्रूते । देव गुणवाञ्-शौर्यान्वितः श्लाघ्योऽहमस्मि । द्वितीयो वदति । सर्वप्राणिभाषावेदी सविद्यो महाधनिको वैश्योऽहम् । तृतीयो वदति । शास्त्रशस्त्रपरायणो विख्यातवीर्यः शूरो राजन्यतनयोऽहम् । चतुर्थो वदति । सर्व-शास्त्रतत्त्वदर्शी धनवान् गुणयुक्तः षड्दर्शनविद् ब्राह्मणोऽहम् । राजा चताननङ्गवतीविवाहयोग्यानवलोक्यैका कन्या कस्मै देयेति विस्मितस्तस्थौ ।

वद राजन् । सानङ्गवती विवाहेन कस्मै देया । राजा वदति । शृणु रे वेताल । वैश्यशूद्रौ कन्याविवाहे त्याज्यौ । ब्राह्मणश्च योग्यः । किन्तु क्षत्रिय एव क्षत्रियापाणिग्रहणे युक्तः । इतिवादिनि नृपतौ वेतालः शिंशपावृक्षे पुनर्ललाग ।

इति स्वल्पनवमो वेतालकथाप्रबन्धः ।

[दशमी कथा ।]

अथ राज्ञा क्रुद्धेन पुनरानीयमानो वेतालोऽपरां कथां कथयति ।

देव, अनङ्गपुरनिवासिनो वीरकेसरिनाम्नो नृपतेर्देशेऽर्थदत्तो नाम वणिक् तस्थौ । तस्य पुत्रो धनदत्तो नाम बभूव । लावण्यवती च तनया भूता । तां सौन्दर्यशालिनीं प्राप्तयौवनामवलोक्यार्थदत्तः पुत्र-मब्रवीत् । भो धनदत्त, लावण्यवतीयोग्यं वरमानय । पितुराज्ञया धनदत्तः सहसा गत्वा कन्दर्पनामानं वणिक्पुत्रं महाधनं सर्वगुणान्वितं वरत्वे व्यवस्थाप्यागत्य पितरं ज्ञापयामास ।

एतावति समये क्रीडावापीं गतां सखीसमेतां लावण्यवती-मवलोक्य तत्पुरनिवासी धर्मदत्तनामा वणिक्पुत्रः कामपीडितोऽपि

कथमपि स्वगृहं गतः । अथास्य सखा चिन्तामणिनामा तं तथाविध-मवलोक्य ब्रूते । सखे कथमेतादृशीमवस्थां गतोऽसि । इति पृष्टः सर्व-वृत्तान्तमकथयत् । श्रुत्वा चिन्तामणिर्वदति । सखे त्वमतीव धनवान् सर्वगुणान्वितः । तस्मात् त्वामवलोक्य लावण्यवती त्वदधीनजीवना भविष्यति । तत्स्वदेशं गत्वात्मानं दर्शयतु भवान् । स तदाज्ञया वदति स्म तस्यां प्रीतायाम् । लावण्यवति, पाणिग्रहणाचिकीर्षुरहम-तीवास्मि । श्रुत्वेमं ब्रूते । भो धर्मदत्त, युक्तमुक्तम् । किन्तु पितुर्निदे-शादन्यस्मै वराय मां विवाहेन दातुं मम भ्राता कल्पितवान् । तत् कथमहं तद्वचनव्यभिचारं करिष्यामि । महाकुलसम्भवाया एतावान् धर्मो न स्यात् । तद् भवान् यत्नं मा करोतु । तच्छ्रुत्वा धर्मदत्तेनोक्तम् । साध्वी भवती । यतः पितुर्भ्रातुश्च वचनं न व्यभिचरितं ततः प्रसन्न-हृदयोऽस्मि । यदपरं वक्ष्यामि तद् भवत्यावश्यं कर्तव्यम् । एतस्य वचनामृतेन तृप्तया लावण्यवत्या तस्मिन्नुक्तम् । भवतु कार्यं भवतः । तच्छ्रुत्वा धर्मदत्तो वदति । यस्यामेव रात्रौ तव विवाहो भविष्यति तस्यामेव स्वामिनानुपभुक्तयौवनया सर्वालङ्कारभूषितया सखीजन-विहीनया भवत्या मत्समीपमागन्तव्यम् । मयैतस्याः क्रीडावाप्या दक्षिणस्यां दिशि स्थातव्यम् । तत्रागत्य मया सह संदर्शनं विधाय निजपतिसमीपं यास्यति भवती । तदङ्गीकृत्य लावण्यवती स्वगृह-मागता । धर्मदत्तोऽपि गृहमागतः ।

अथैकदा तस्याः कन्दर्पवरेण सह विवाहो बभूव । अथ शय्या-मायातां लावण्यवतीमवलोक्य कामपीडितः कन्दर्पस्तस्याः स्तनोपरि हस्तं प्रसारितवान् । इत्येव काले लावण्यवती धर्मदत्ताभिमतवचनं कन्दर्पायाब्रवीत् । कन्याभाषितं श्रुत्वा कन्दर्पः कामपीडितोऽपि तामादिदेश । गच्छतु भवती । तन्मनोरथपूरणमाचर्य मया सह सुखमनुभविष्यति भवती ।

तस्मादियं गच्छन्ती सर्वालङ्कारग्रहणार्थं क्व यासीति चौरेण पथि सा धृता । तदानीं कातरा सती सा चौरमिदमब्रवीत् । भोस्तात, धर्मदत्तस्य सत्यवचनेन बद्धास्मि । ततस्तां सत्यपरायणां विचिन्त्य चौरस्तत्याज । अथ तां गच्छन्तीं वटवृक्षाश्रितो राक्षसस्त्वामहं खादिष्यामीति कृत्वा धृतवान् । ततः सा तमिदमब्रवीत् । तात, धर्मदत्तस्य सत्यवचनेन बद्धास्मि । तन्निर्वाहितसत्यामागच्छन्तीमत्र मां खादिष्यति भवान् । ततस्तां सत्यशीलामालोक्य ब्रह्मराक्षसोऽपि मुमोच ।

अथातो गत्वा सङ्केतस्थानमियं प्राप्तवती । तदा धर्मदत्तो लावण्यवतीं समायातामालोक्य तस्याः पदद्वये पुटाञ्जलिमकरोद् व्याजहार च । लवण्यवति, तव सत्यवचनेन प्रीतोऽस्मि । तत् कथमहं पापिष्ठस्तव सतीत्वनाशं करोमि । ततः सत्वरमेन तत्र गत्वा स्वामिनोऽनुकूला भवतु भवती । सुप्रीतेन धर्मदत्तेन प्रस्थापिता ततः सा गच्छन्ती ब्रह्मराक्षसमवोचत् । ततोऽहमागतास्मि । मदीयाभरणं चौराय दत्वा मम शरीरं खादतु भवान् । ततो ब्रह्मराक्षसस्तामतीवसत्यवादिनीमवगम्याब्रवीत् । लावण्यवति तव प्रीतोऽस्मि । स्वगृहं गच्छतु भवती । ब्रह्मराक्षसेनापि त्यक्ता सा चौरसमीपं गत्वा वदति । चौर, ममाभरणमिदं गृह्णातु भवान् । चौरस्तामायातामतिसत्यपालयतीमवलोक्याब्रवीत् । लावण्यवति, तव प्रीतोऽस्मि । स्वालङ्कारा स्वगृहं गच्छ । अनेनापि त्यक्ता स्वामिनः शय्यामागतवती । तामायातामालोक्य कन्दर्पोऽब्रवीत् । वणिक्पुत्रि, त्वमिदानीं मम प्रशंसनीया न भविष्यसि । इत्युक्त्वा कामपीडितोऽपि त्रैलोक्यमोहनीयाकृतिं मुमोच ।

वद राजन् । कन्दर्पचौरब्रह्मराक्षसधर्मदत्तानां मध्ये को महासत्त्वः । राजा वदति । शृणु रे वेताल । कन्दर्प एव महसत्त्वः । यतः

प्रथमतोऽपि लावण्यवत्याः सत्यरक्षणं धर्मदत्तस्य प्राणरक्षणं विचिन्त्य कामाहतोऽपि तां त्रैलोक्यमोहिनीं पत्नीं स्वयमादिदेश। अथागतामपि परपुरुषरतामिति तत्याज। अपरेषां त्रयाणां विवेकः। नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

इति दशमो वेतालकथाप्रबन्धः।

[एकादशी कथा।]

क्रोधेन राज्ञा पुनरानीयमानो प्रश्नान्तरमकार्षीत्।

राजन्, काञ्चनपुरनाम्नि नगरे धर्मध्वजनामा राजा बभूव। तस्य राज्ञः शृङ्गारवतीमृगाङ्कवतीतारावतीनामधेयं महादेवीत्रयं रूपयौवनसम्पन्नमासीत्। अथैकदा क्रीडावापीतटावस्थिते मण्डपे स राजा शृङ्गारवत्या समं जगाम। तदानीं रममाणस्य राज्ञः कर्णादुत्पलमेकमपप्तत्। तदुत्पलघातेन शृङ्गारवती पराङ्मुखी मूर्छां जगाम। राजा तद्विपत्तिशान्तये वैद्यप्रयोगमकरोत्। ब्राह्मणाय धनमदात्। तत्पुण्यवशात् कथमपि शृङ्गारवती जीवितवती। अथापरदिने राजा मृगाङ्कवत्या सह क्रीडां चिकीर्षुस्तस्मिन्नेव समये मणिमण्डपे विरराम। ततश्चन्द्रस्य रश्मिना मृगाङ्कवत्याः शरीरं चूर्णितमिव भूतम्। तदा राजा व्याकुलात्मा वैद्यप्रयोगैरशेषदेवब्राह्मणदानस्वस्त्ययनैः कथमपि जीवयति स्म। अथापरदिने तारावतीमादाय तत्र गत्वा राजा क्रीडन्नास्ते। तस्मिन्नेव समयेऽतिदूरमेका दासी धान्यानि कुट्टयति। तेनैव मुशलशब्देन तस्या गात्रे विस्फोटोऽभवत्। येन विधिना मृगाङ्कवती जीवयिता तेनैव मतेन राजा तारावतीं जीवयति स्म।

वद राजन्। तासां मध्ये सुकुमाराज्ञी का भवति। राजा

वदति शृणु रे वेताल। तारावती सुकुमाराङ्गी यतोऽस्याः शरीरे मुश-
लशब्देनैव विस्फोटो जातः। अपरोऽप्यभिघातः। नृपताविति वादिनि
वेतालः शिंशपावृक्षे पुनर्ललाग।

इत्येकादशो वेतालकथाप्रबन्धः।

[द्वादशी कथा।]

अथ राज्ञा पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, कुसुमपुरनामधेयं नगरमेकमासीत्। तत्र देवस्वामी
नाम ब्राह्मणः प्रतिवसति। तस्य पुत्रो हरिस्वामी नामाभूत्। सुता च
विलासवती भूता। सा कन्या देवस्वामिना पार्श्ववर्तिने सोमशर्मनाम्ने
विप्राय विवाहेन दत्ता। स ब्राह्मणस्तया सह विविधसुखमनुभवं-
स्तिष्ठति। अथैकदा विलासवत्या सह सोमशर्मा सौधपृष्ठे रतिक्रीडा-
माचर्य निर्भरनिद्रां जगाम। इत्येवकाले मदनवेशधरो नाम विद्याधर
एकस्तस्मिन्नागतः सौन्दर्यनिर्जितविद्याधरीमपहृत्य विद्यापुरं जगाम।

सोमशर्मा च तां नावलोक्य नानाप्रयत्नेन नासाद्य देशान्तर-
मकरोत्। इतस्ततो भ्राम्यन् बुभुक्षितः सन् पद्मनाभस्य गृहमगमत्।
पद्मनाभो यत्नेन ब्राह्मणीमब्रवीत्। वल्लभे, अयं ब्राह्मणो महात्मा यत्नेन
पूजयितव्यः। इत्युक्त्वा स राजस्थानमगमत्। मन्त्रिनिदेशान्मन्त्रि-
पत्न्या गृहमागच्छेत्यभ्यर्थितो ब्राह्मणो ब्रूते। मातरत्र मयैकाकिना न
भोक्तव्यम्। यदन्नं मह्यं दातव्यं तद्दीयताम्। तदहं पुष्करिणीसमीप-
मागत्य भक्षयामि। तया निवारितोऽपि भक्ष्यद्रव्यमादाय पुष्करिणीं
गत्वा तद् वृक्षमूले संस्थाप्य जलमानेतुमगात्। इत्येवकाले श्येनेनानीय
खाद्यमानस्य सर्पस्य गरलं तद्द्रव्ये निपतितम्। जलमानीय ब्राह्मणस्तद्
भक्ष्यद्रव्यं विषमिश्रितमज्ञानतो जग्ध्वा परलोकमगात्। ततः पद्म-

नाभः पत्न्यै चुकोप। सा ब्रूते। प्रभो, न ज्ञात्वा मयि कोपं मा करोतु भवान्। बहुतरयत्नेन मया निवारितो गृहे भोजनमकृत्वा द्रव्यमादाय लज्जया गतः। मम को दोषः। ततः पद्मनाभः परितापमकरोत्।

वद राजन्। सोमशर्मणो वधः किं श्येने किं वा मन्त्रिणि मन्त्रिपत्न्यां वा मदनवेषधरविद्याधरे वा भवति। राजा वदति। शृणु रे वेताल। श्येनस्य सर्प एव भक्ष्य एतेन तत्र न वधः। मन्त्रिपत्न्यादरेण नानायत्नेन भोक्तुमभ्यर्थितोऽन्यत्र भोक्तुं निवारितः। तेन तस्यामपि न वधः। किन्तु मदनवेषधरविद्याधरपद्मनाभमन्त्रिणोरेवास्य वधो भवति, एकस्मिन् विलासवतीहरणादपरस्मिन् मन्दादरत्वात्। इतिवादिनि भूपाले वेतालः पुनः शिंशपावृक्षे ललाग।

इति द्वादशवेतालकथाप्रबन्धः।

[त्रयोदशी कथा।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, उत्तरस्यां दिशि नयपालो नाम राजा बभूव। तस्य पद्मावत्यां पत्न्यां रूपयौवनसम्पन्ना शशिप्रभा नाम कन्यासीत्। एकदा चैत्रबलिमहोत्सवे सखीवृन्दपरिवृता क्रीडावापीं गता। तथा च भट्टपुत्रो मनःस्वामी नाम तामालोक्य कामपीडितोऽभवत्। ततः पौरजनस्य पुत्रः समागत इति सखीभ्यः श्रुत्वा क्रीडावापीं विहाय सा नदीमगमत्। भट्टपुत्रोऽपि तत्र गत्वा जले निमज्ज्य स्थितः। अत्रान्तरे सखीभिः सह जलक्रीडामारब्धवत्यास्तस्याः केशविगलितकुसुमं स्रोतसा चलितमासाद्य निजदेहे तापोपशमनार्थमारोप्यैकदृष्ट्या तामा-

लोक्यानिर्वचनीयसुखमनुभवंस्तिष्ठति । सापि मनःस्वामिनोऽतिसौन्दर्यमालोक्य सानुरागिणी बभूव ।

तत्र हस्तिनीशतं जलमज्जनार्थमगमत् । तदभ्यन्तरे हस्तिनीमेकामालोक्य मत्तकुञ्जर एक आगत्य मिलितः । तद्भयात् शशिप्रभायाः सर्वे रक्षकजनाः पुरुषाः सख्यश्च सर्वास्तामपहाय पलायिताः । तदानीमेकाकिनीं स्थितां तामागत्य मनःस्वामी निर्भरं परिरभ्य दूरं नीतवान् । करिणीषु गतासु मत्तकुञ्जरे च गते रक्षकपुरुषाः सख्यश्च शशिप्रभास्थानमाजग्मुः । तदा सखीभिर्मनःस्वामिनं ध्यायन्ती कथमपि स्वगृहं प्राप्तवती मनःस्वामी च तां ध्यायन् सर्वभोगानपहाय विषसाद । तं तथाविधमालोक्य शशिदेवमूलदेवाभ्यामुक्तम् । अयं मनःस्वामी विरहव्याकुल इव लक्ष्यते । शशिदेवेन पृष्टो मनःस्वामी सकलवृत्तान्तमवदत् । तच्छ्रुत्वा मूलदेवेनोक्तम् । मनःस्वामिन्, त्वमस्माभिः सहागच्छ । तवाभिलषितसिद्धिमावां करिष्यावः । ततो मनःस्वामी तयोः किङ्करकल्पो भूत्वा ताभ्यां सह स्थितः ।

एकदा मूलदेवो मनःस्वामिनमब्रवीत् । भट्टपुत्र, तुभ्यमहमेकां विद्यां ददामि यया स्त्रीरूपं पुरुषरूपं च धार्यते । ततस्तामासाद्य मनःस्वामी सहसा कुमारीवेषधरोऽभवत् । अथ कुमारीवेषधरमादाय वृद्धब्राह्मणरूपं विधृत्य मूलदेवो धूर्तवरो नयपालनृपतेरन्तिकं जगाम । गत्वा ब्रूते । महाराज, वृद्धब्राह्मणोऽहम् । इयं कुमारी मदीयपुत्रवधूर्भविष्यति । अनया प्रतिज्ञातामिति–उज्जयिन्यां गत्वा यः पुरुषो भगवन्तं महाकालमर्चयित्वायाति तस्यैवाहं पत्नी भवामीति । एतेन हेतुना मम पुत्र उज्जयिन्यां भगवन्तं महाकालमर्चयितुं गत्वास्ते । स यावदायाति तावदियं कुमारी भवतो दुहितुः शशिप्रभाया मन्दिरे तिष्ठतु । तेनैवास्या रक्षा भविष्यति । अहमस्या रक्षणाक्षमो वृद्धः । ततो राज्ञा स्वीकृतम्–तावदियं शशि-

प्रभया सह सुखेन तिष्ठतु । तदा शशिप्रभाया गृहे तां समर्प्य स वृद्धब्राह्मणः स्वगृहमगमत् ।

तदारभ्य कुमारीवेषधरो मनःस्वामी शशिप्रभया सह नानाविश्रब्धालापं कुर्वंस्तिष्ठति । एकदा शशिप्रभामब्रवीत् । सखि, तवाहं प्राणसमा सखी भूता । इदानीं त्वामहं चिन्ताकुलामिव पश्यामि । तदवश्यं त्वया मयि दुःखकारणमभिधातव्यमेव । तया पृष्टेयं वदति, सखि, मनःस्वामिविरहाकुलिताहम् । तच्छ्रुत्वा तामभ्यधात् । तं भट्टपुत्रमहमानीय तव दर्शयिष्यामि । तच्छ्रुत्वा शशिप्रभा ब्रूते । सखि, त्वं मम प्राणाधिका । तत् कथं परिहासवचनेन मयि दुःखमुत्पादयसि । तच्छ्रुत्वा कुमारीवेषधरो ब्रूते । आः कथमेतद् वदसि त्वम् । चक्षुषी निमील्य क्षणं तिष्ठ । ततस्तं भट्टपुत्रं पश्यसि । यत्नातिशयेन सा चक्षुषी निमील्य स्थिता । सहसैवायं कुमारीवेषधरो विद्याप्रभावेण भट्टकुमारोऽभवदवदच्च । शशिप्रभे त्वदधीनजीवनमनाथमिवागतं पश्य । तदा सा मनःस्वामिनमालोक्य हर्षिता विस्मिता च तस्थौ । ततस्तेन मनःस्वामिना सहाशेषसुखमनुभवन्ती तिष्ठति ।

अथ शशिप्रभाया मातुर्भ्रातुर्नृपमन्त्रिमदनसेनस्य पुत्रो विजयसेनः कनकपुरनृपकन्यां मृगाङ्कवतीं विवाहयित्वा स्वगृहमागतः । तस्मिन् काले मदनसेनमन्त्रिणा राजनि विज्ञाप्य शशिप्रभानीता । तदानीं कुमारीवेषधरं धृत्वा शशिप्रभया सह मनःस्वामी गतः । तत्र मनःस्वामिनं कुमारीवेषधरमवलोक्य विजयसेनः कामपीडितोऽभवत् । पितरमप्यवादीत् । तात, यद्यहं शशिप्रभायाः प्रियसखीं विवाहयामि तदा जीवामि नान्यथा । ततः पुत्रमरणमनुचिन्त्य मदनसेनो भगिनीपतिं नयपालराजानमवादीत् । राजा ब्रूते । मन्त्रिन्, कथमेतद्दुष्करं कर्म शक्यं स्यात् । वृद्धब्राह्मणस्य पुत्रो महाकालमर्चयित्वास्याः पाणिग्रहणं करिष्यति । तदानीमहं किमुत्तरं दास्यामि । अतोऽशक्य-

मेतत्। मन्त्री ब्रूते। कुमारश्चिरेणात्रागमिष्यति। मम पुत्रः सम्प्रति म्रियते। तन्मया किं वक्तव्यम्। विशेषतश्च पुत्रमरणे ममापि मरणं भविष्यति। राजा वदति। वृद्धब्राह्मणस्योत्तरं तदा भवता दातव्यम्। मन्त्री वदति। भवतु। मयैव तस्य शान्तिरुत्पादयितव्या। तदानीं राजा तां कुमारीं मदनसेनाय मन्त्रिणे समर्पितवान्। विजयसेनश्च तस्याः पाणिग्रहणचिकीर्षुरभवत्। कुमारी वदति। मन्त्रिपुत्र, त्वमुज्जयिन्यां गत्वा महाकालमभ्यर्च्य मम पाणिग्रहणमाचर। यद्येवं न करोषि तर्हि तवोपरि प्राणांस्त्यक्ष्यामि। मम प्रतिज्ञैवम्। तच्छ्रुत्वा विजयसेनः सहसा महाकालमर्चयितुमुज्जयिनीमगमत्। अथ मृगाङ्कवत्यासहायं कुमारीवेषधरो मनःस्वामी विद्याप्रभावेण पुरुषो भूत्वा नानासुखमनुभवंस्तिष्ठति।

अथ कियति काले गते मनःस्वामिना मनसेति चिन्तितम्। मृगाङ्कवतीमादाय मूलदेवस्य स्थानं गच्छामि। स धूर्तवरो न्यायावसरं प्राप्य जेतुं शक्नोति। अथ मृगाङ्कवतीमादाय गत्वा मूलदेवाय सर्ववृत्तान्तमवादीत्। तच्छ्रुत्वा मूलदेवो हसन् मृगाङ्कवत्या समं मनःस्वामिनं तत्र संस्थाप्य विद्याप्रभावेण वृद्धब्राह्मणो भूत्वा शशिदेवं पुत्रवेषधारिणमग्रतः कृत्वा नयपालनृपतेरन्तिकं जगाम। देव, कुमारी दीयताम्। ममैष पुत्रो महाकालमर्चयित्वा तस्याः पाणिग्रहणं चिकीर्षुरागतः। तं ब्राह्मणकुमारमवलोक्य चिन्तितो मन्त्रिणमानीय वदति। मन्त्रिन्, पूर्वमेतन्मया भणितम्। अधुना यथोचितोत्तरं दत्त्वा तोष्यताम्। मन्त्री वदति। तात, वृद्धब्राह्मण, सा ते कुमारी मृतकल्पा, कस्मै विवाहेन दत्ता। इदानीमपरकन्या तव पुत्राय दातव्या। इति यत्नशतेनापि निवारितो न स्यात्। वृद्धब्राह्मणस्तस्य नृपतेरुपरि पुत्रेण सह मर्तुमुद्यतोऽभवत्। ततो राजा तस्य चरणे पतित्वा वदति। तात, रक्ष माम्। या कन्या तव पुत्रेणेष्यते सैव मया तस्मै दातव्या।

ततो धूर्तवरो मूलदेवो रूपधरं शशिदेवमब्रवीत् । पुत्र विनीतस्य नृपतेर्वचनं शृणु । तदा शशिदेवेनोक्तम् । तात, यद्येतच्छ्रोतव्यं तदा राजा निजकन्यां शशिप्रभां मह्यं ददातु । तच्छ्रुत्वा राजा ब्रह्मवध-भयाच्छशिप्रभां कन्यां द्विजपुत्राय ददौ ।

ततस्तामादाय मूलदेवशशिदेवौ स्ववासमाजग्मतुः । तदानीं मनःस्वामी वदति तात, मूलदेव, मम प्राणाधिका शशिप्रभा भवता-नीता । ममाभिलषितसिद्धिर्भूता । शशिदेवेनोक्तम् । किमहो स राजा मह्यं शशिप्रभां दत्तवान् । अस्याः पाणिग्रहणं मया कर्तव्यम् । तत् कथमयोग्यमेतादृशं वदसि । मनःस्वामी वदति । इयं शशिप्रभा मम भार्या, पुरा यतः मया परिणीता । तद् भवान् कथमेतादृशं वदति । शशिदेवो वदति । भट्टपुत्र, चौरिकयास्यां गान्धर्वविवाहः कृतः । तेन किं स्यात् । मह्यं राजा स्वेच्छया दत्तवान् । तौ शशिदेव-मनःस्वामिनावन्योन्यं कलहं कुर्वाणौ स्तः ।

वद राजन् । शशिप्रभा कस्य भार्या भवति । राजा वदति । शृणु रे वेताल । मनःस्वामिना यत् कृतं तल्लोकद्वयविरुद्धमेव । पित्रा सा शशिदेवाय दत्ता । अतः शशिदेवस्य भार्या भवति । इति वदति भूपाले वेतालः शिंशपावृक्षे पुनर्ललाग ।

इति त्रयोदशवेतालकथाप्रबन्धः ।

[चतुर्दशी कथा ।]

अथ राज्ञा पुनरानीयमानो वेतालः कथामपरां कथयति ।

देव, कनकपुरनाम्नि नगरे महात्मा यशोधनो नाम राजा बभूव । तस्य राज्ये महाधनो रत्नदत्तो नाम वणिक् तस्थौ । तस्य

सर्वलक्षणसम्पन्ना कन्यका भूता । तस्या नामकरणादिवसे ये ये समागतास्ते ते ते यौवनहीनामपि समालोक्य कामपीडिता भूताः । अतस्तस्या उन्मादयन्ती नामाभूत् । अथ तस्यां रूपयौवनसम्पन्नायां स रत्नदत्तो यशोधननृपतेरान्तिकं गत्वेदं वदति । देव, मम कन्या उन्मादयन्ती द्वात्रिंशल्लक्षणोपेता भवतामेव योग्या । अतस्तामानयतु देव । तच्छ्रुत्वायं राजा हर्षितः स्त्रीलक्षणवेदिनं ब्राह्मणमेकं लक्षणवतीं द्रष्टुं प्रस्थापितवान् । स ब्राह्मणो नृपनिदेशाद्रत्नदत्तस्य गृहं गत्वा तामुन्मादयन्तीं सर्वलक्षणसंयुक्तां त्रैलोक्यमोहिनीं विद्याधरीमिवावलोक्य चिन्तितवान् । यद्येनां सर्वलक्षणसम्पन्नामुन्मादयन्तीं राजानं ज्ञापयामि तदैनां कन्यामासाद्य राजा सर्वमहादेवीस्त्यक्ष्यति । मुक्तराज्यचिन्तोऽपि भविष्यति । अतो निर्लक्षणां ज्ञापयमास । ततो राजा तां नानीतवान् । अतो रत्नदत्तः तां सेनानीरणधवलाय दत्तवान् ।

अथैकदा मधुमासे स राजा पौरजनान् विहाय प्रदोष इतस्ततः क्रीडां कुर्वन् विद्यते । तदोन्मादयन्ती मनसेति चिन्तितवती । राजा यशोधनोऽयं निर्लक्षणां कृत्वा मां न नीतवान् । तदिदानीं दिव्यालङ्कारं परिधायात्मानं दर्शयामि । ततो राजोच्चैःस्थानमारुह्य तामालोक्य कामपीडितो धावकमपृच्छत् – केयमिति । तेनोक्तम् । देव, सैषा रत्नदत्तस्य दुहितोन्मादयन्ती या सेनानीरणधवलेन विवाहिता । इति श्रुत्वा राजा स्त्रीलक्षणवेदिने ब्राह्मणाय क्रुध्द्वा कथमपि निजान्तःपुरं गत्वा विहितसर्वभोगत्यागस्तामेव ध्यायंस्तस्थौ ।

ततो धावकेन मनसेति चिन्तिम् । राजा रणधवलस्य पत्नीमवलोक्य कामानलदग्ध इव आस्ते । तदहं रणधवलं ज्ञापयामि यथा तामानीय ददाति । इति कृत्वा रणधवलमब्रवीत् । तच्छ्रुत्वा रणधवलः सहसा गत्वा राजानमब्रवीत् । देव, तामुन्मादयन्तीं तुभ्यमहं समर्पयामि । राजा तद्गतमानसोऽपि लोकधर्मं विचिन्त्य ब्रूते ।

स मित्रं यो निवारयेत् पापात्, स एवामात्यः। तद् भवता कथमेतन्मयि भण्यते। रणधवलो वदति। देव यदि तां भवान् न स्वीकरोति तदाहं यस्मै कस्मैचिद्दास्यामि ताम्। तथापि राजा तां न नीतवान्। तस्या विरहेण राजा परलोकमगात्। ततो रणधवलोऽपि हा हेति कृत्वा प्राणांस्तत्याज। रणधवले मृते उन्मादयन्ती मृता।

वद राजन्। यशोधनो महासत्त्वः किं वा रणधवल उन्मादयन्ती च। राजा वदति। शृणु रे वेताल। सेवकानामयमेव धर्मो यत् प्रभुकार्ये प्राणांस्त्यजन्ति। स्त्रियश्च स्वभावतः पतिवर्त्मगाः। किन्तु राजा यशोधनो महासत्त्वो यतस्तामासाद्यापि परलोकमनुचिन्त्य तत्याज। परं प्राणांश्च तत्याज। नृपताविति वादिनि स वेतालः शिंशपावृक्षे पुनर्ललाग।

इति चतुर्दशवेतालकथाप्रबन्धः।

[पञ्चदशी कथा।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, रत्नावती नाम नगरी पुरासीत्। तत्र चन्द्रप्रभो नाम राजा बभूव। तस्य राज्ये देवस्वामी नाम विप्रस्तथौ। तस्य पुत्रो हरिस्वामी नामाभवत्। स पितुः सर्वस्वं द्यूतेन विनष्टं कृत्वापि द्यूतं न त्यजति। अथ शास्तिकेन धृत्वा नानायत्नेनापि किञ्चिन्नासाद्य दण्डेन ताडितो मूर्छामासाद्य पतितः। ततः शास्तिको भयाज्जले निमग्नं तं कृत्वानुपलक्षितः स्वगृहमगमत्। स हरिस्वामी जलं प्राप्य कथमपि प्राप्तजीवनो भूत्वा तत्र स्नात्वा द्यूतपरित्यागार्थं प्रतिज्ञामकरोत्। गृहं च तत्याज। तदारभ्य भगवन्तमर्चयित्वा कृतफलमूलाहारः कालं नयमान आस्ते। अथ तं प्रणतं भगवान् महाकालो-

ऽब्रवीत्। भो द्विजपुत्र, प्रीतोऽस्मि। त्वामहं सुखमनुभावयामि। तच्छ्रुत्वा विप्रेणोक्तम्। भगवानेव प्रमाणम्। मया किं वक्तव्यम्।

ततो निद्राकालेनास्य मस्तके हस्तो न्यस्तः। ततो हरिस्वामी निद्रागतो भूत्वा स्वप्ने दिव्यनगरमासाद्य भावानुरक्तविद्याधरीशतेन नानासुखमनुभूय परां प्रीतिमासाद्य प्रबुद्धोऽयं स्वप्नामिव नीतवान्। प्रतिदिनमेवं याति पश्यति च। ततोऽयं हरिस्वामी निद्रागतः भगवन्तमभ्यधात्। भगवन्, यदि मय्यनुकम्पा विद्यते तदा मन्त्रमेकं मह्यं ददातु भवान्। महाकालेनोक्तम्। वत्स, निजपरविभागो यस्य पुरुषस्य नास्ति तस्मिन्नेव मन्त्रसिद्धिर्भवति। तथापि द्विजो नानायत्नमाचरति। प्रबन्धातिशयेन भगवान् वदति। द्विज, सिप्रानदीं गत्वा तुभ्यमहं मन्त्रं दास्यामि। ततस्तस्या जले निमज्ज्याग्नौ प्रवेशमाचर्याग्निजलाभ्यां समभागे भूते तव मन्त्रसिद्धिर्भविष्यति। इति मन्त्रमदात्।

अथ प्राप्तमन्त्रो हरिस्वामी सहसा नगरमेकमपश्यत्। तत्र विद्याधरीमेकां विवाह्य तया सह नानासुखमनुभवन् कालमनैषीत्। तस्यां बहवः पुत्राः कन्याश्चानेनोत्पादिताः। अथैकदा सर्पेण दष्टा सा परलोकं गता। ततस्तां श्मशाने नीत्वा हरिस्वामी विलपंस्तिष्ठति। एतावति समये विद्याधरस्तं द्विजं शोकेन विलपन्तमवलोक्याब्रवीत्। द्विज, यद्येषा न जीवति तदास्याः शोकेन तवापि जीवनं न दृश्यते। अतः स्वीयमर्धायुरस्यै दातुं स्वीकुरु। तदा विद्याप्रभावेण वयमेतां जीवयामः। तथा रूढानां विद्याधराणां वचनमाकर्ण्य तथा स्वीकृतम्। अथ तया जीवितम्। तया सह गृहमागत्य सुखेन तस्थौ। अथ तेन मन्त्रेण जलादुत्थायाग्निप्रवेशाक्षमोऽभवत्। अथ पुनर्गत्वा तमेव भगवन्तं मन्त्रसिध्यर्थमभ्यर्थयत्। तदानीं महाकालोऽपि मन्त्रसिद्धिहीनोऽभवत्।

वदतु देव। कथं महाकालो मन्त्रहीनोऽभवत्। राजा वदति। शृणु रे वेताल। शिष्यदोषेण गुरुरपि दोषवान्। अतः सोऽपि मन्त्रहीनोऽभवत्। इति नृपतेर्मौनभङ्गं कृत्वा वेतालः शिंशपावृक्षे पुनर्ललाग।

इति पञ्चदशो वेतालकथाप्रबन्धः।

[षोडशी कथा।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, कर्कटपुरनाम्नि नगरे सूर्यप्रभो नाम नरपतिरासीत्। तस्य राज्ये धनदत्तो नाम वणिक् प्रतिवसति। तेन हिरण्यवतीनामधेयायां पत्न्यां धनवती नाम कन्योत्पादिता। अथैकदा धनदत्तस्य सर्वस्वं दैववशाद्विनष्टमभवत्। अभावतोऽयं धनदत्त ऋणादि कृत्वा परलोकमगात्। अथोत्तमर्णेनास्य पत्नी पुत्रीसमेता तदानीं बद्धा। हिरण्यवती मनसेति चिन्तितवती। अहं किमर्थं इह बद्धा निवसामि। तदिमां धनवतीमादाय पतिसुहृत्तमस्य गृहे तिष्ठामि। स मे स्नेहात् पालनमाचरिष्यति।

इति दुहितरमादाय रात्रौ गच्छन्ती विद्यते। अनन्तरं शूलस्थितश्चौरः कन्यामवलोक्याब्रवीत्। मातरिमां कन्यां मह्यं देहि। बहुतरधनमिह विद्यते। तन्नयतु भवति। तच्छ्रुत्वा सा ब्रूते। वत्स, शूलस्थितस्य भवतोऽस्याः पाणिग्रहणेन किं कर्तव्यम्। चौरो वदति। मातर्मदीयधनेन भद्रतरपुरुषस्य बीजक्रयणमाचर्य तेनैव पुरुषेण सममिमां क्रीडयिष्यसि। तदुत्पन्नेन क्षेत्रजपुत्रेण मम परलोकसौहृद्यं कर्तव्यम्। तच्छ्रुत्वा हिरण्यवती तेन निर्दिष्टसुवर्णान्यादाय चौराय धनवतीं विवाहेन दत्तवती। विवाहं कृत्वा चौरः सहसा परलोकमगात्। हिर-

ण्यवती पुत्रीसमेता ताम्रलिप्तिकानिवासिनः सुहृत्कुमारस्य गृहं गतवती। तां मित्रपत्नीं पुत्रीसमेतामवलोक्य विविधादरेण समाश्वास्य नीत्वा पत्न्यां समर्पितवान्। पत्युर्निदेशात् सा तां प्रसारकावीथिकां नीत्वा क्रयविक्रयार्थं प्रस्थापितवती। तया नियुक्ता सा पुत्री तत्र स्थिता।

एकदा प्रसारकवीथिस्थितां धनवतीं दृष्ट्वा सोमस्वामी नाम ब्राह्मणः कामपीडितोऽभवत्। धनवती च तं द्विजं मनोहरमालोक्य मदनविह्वला मातरमब्रवीत्। हिरण्यवती चौरस्य वचनं स्मृत्वा विविधादरेण बीजक्रयपूर्वकं सोमस्वामिनमानीय क्रीडयामास। सोमस्वामी च गर्भं दत्वा परलोकमगमत्। एतावति भगवत्या हिरण्यवत्यै स्वप्नो दत्तः। हिरण्यवति, तव पुत्री पुत्रं प्रसविष्यति। तं गुप्तेन नीत्वा राजद्वारि स्थापयिष्यसि। इत्युक्त्वा देवी नृपमभ्यधात्। नृप, भवानद्य यं शिशुं प्राप्नोति तमेवानीय पुत्रं करिष्यति। धनवत्याः पुत्रो जातः। हिरण्यवती च निजदेशाद्राजद्वारि तथाविधं कृत्वा स्थितवती। राजा प्रातःसमये तं प्राप्य पुत्रं कृत्वा महिष्यै समर्पितवान्।

अथायं धनवतीपुत्रो वर्धमानः सकलनीतिशास्त्रशस्त्राभ्यासं कुर्वाणस्तिष्ठति। अथ राजा वृद्धः परलोकमगमत्। तत्पुत्रोऽयमिति कृत्वा सर्वैरमात्यैरवनीपतिरयं कृतः। तेनैकदा गयायां गत्वा दत्तस्य पिण्डस्य ग्रहणार्थं हस्तत्रयमुत्थितमभूत्। एको हस्तश्चौरलक्षणान्वितः। अपरो हस्तो विप्रलक्षणान्वितः। तृतीयोऽवनिपातिचिह्नान्वितः। तानवलोक्य कस्मै पिण्डा देया इति संदेहाकुलहृदयः कुमारस्तस्थौ।

वदतु देव। चौरविप्रनरेन्द्राणां मध्ये कस्तस्य पिता भवति। राजा वदति। शृणु रे वेताल। चौर एव तस्य पिता भवति। नृपतावितिवादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

इति षोडशवेतालकथाप्रबन्धः

[सप्तदशी कथा ।]

अथ पुनरानीयमानो वेतालोऽपरप्रश्नमकार्षीत् ।

देव, चित्रकूटनाम्नि नगरे चन्द्रावलोको नाम राजा बभूव । तस्य महादेवीन्दुमती नामाभवत् । तया सह राजा सुखमनुभवंस्तिष्ठति । एकदाऽसौ राजा द्यूतेन सर्वस्वं विनष्टं कृत्वा सुदुःखितो हयमारुह्यारण्यानीं प्रविश्य श्रान्तः सन् मनोहरं सरोवरमवलोक्य तत्र स्नात्वा जलपानं कृत्वा मृणालादिकं खादित्वा सरस्तीरे तिष्ठति । इत्येव काले कियद्दृष्टिं दत्वा मुनेराश्रममपश्यत् । तत्र गत्वा त्रैलोक्यमोहिनीयाकृतिं मुनिकन्यामालोक्य कामपीडितोऽभवत् । मुनिकन्या च तस्मा अभ्युत्थानं चकार । ततो राज्ञादरेण कन्या पृष्टा । भो वरवर्णिनि, किमर्थमेकाकिन्यरण्ये वसासि । तस्मान्मां त्वदधीनजीवनं भजस्व । तयोक्तं राजन्, एतस्मिन् क्षणे मुनिराश्रममागमिष्यति । तस्मान्मया सह कथनेनालम् । सुगुप्ते देव तिष्ठतु । पश्चात् तवाभिलषितं कर्तव्यम् । कन्यावचनाद्राजान्यत्र गतः । कन्या तं राजानं ध्यायन्ती विद्यते । मुनिरागत्य तां चिन्ताकुलामधिगम्य पप्रच्छ । ततः सा नम्रमुखी संभूय लज्जितापि नृपतेरागमनं कथयामास । तच्छ्रुत्वा हर्षितेन मुनिना राजानमानीय कन्या दत्ता ।

अथ तां प्रेयसीमादाय मुनिं प्रणम्य राजा स्वदेशं गच्छन्नास्ते । अथ रात्रौ वटवृक्षतले यक्षः कन्यासहितं राजानमवोचत् । त्वं मयाद्य खादितव्यः । राजा ब्रूते । कस्त्वम् । तेनोक्तम् । यक्षोऽहम् । राजाह । तुभ्यमहं तत्र बलिं दास्यामि । मां मुञ्च । यक्षेणोक्तम् । मदभीप्सितं बलिं दास्यसि । राजा वदति । आज्ञापयतु देव । यक्षेणोक्तम् । कुमारबलिं दास्यसि । राजा वदति । केन विधिना बलिर्देयः । यक्षो वदति । स्वेच्छया यदि कुमारो मरणमिच्छति तस्य चरणौ माता

दधाति भवता यद्यात्मना तस्य शिरश्छिद्यते तदैव हि तुष्टो भवामि। राजा तमेव स्वीकृत्य स्वदेशमागत्यैवंविधं बलिं कुत्रापि नासाद्य चिन्तितो विद्यते।

अथ सप्तदिवसोपरि कुमारैकेन पिता भणितः। पितः, नृपकल्याणार्थं मां त्वं बलिं देहि। तस्य मातृपितृभ्यां यत्नसहस्रेणापि निवारितोऽपि ब्रूते। यद्येवं युवाभ्यां न कर्तव्यं तदा मयात्मघातं कृत्वा मर्तव्यम्। राजनि मृते सर्वलोका नाशं गमिष्यन्ति। मयि मृते कस्य किं भविष्यति। तस्मादेतावद्धर्मः कथं त्याज्यः। ततो धर्ममनुचिन्त्य पितरौ गृहीत्वा राजनि ज्ञापितमिदम्। देव, मां दत्वा निजकल्याणमाचर। ततो राजा तान् सर्वान् गृहीत्वा यक्षस्य स्थानं गत्वा तेन विधिना कुमारबलिं दातुमुद्यतो भूत्वा ब्रूते। देव निजरक्षार्थमिष्टदेवतास्मरणं कुरु। तच्छ्रुत्वा कुमारो हसति। त्रिकालज्ञत्वेन यक्षेणापि कुमारस्य हास्यमाकर्ण्योच्चैरट्टाट्टहासमकारि। कुमारबलिश्च न गृहीतः।

देव, कुमारयक्षयोर्हास्यकारणं वद। राजा वदति। शृणु रे वेताल। कुमारेण मनसेति चिन्तितम्। मम मातापितृभ्यां मे चरणकेशा धृताः। अयं राजा स्वयं खड्गमादाय बलिं दातुमुद्यतो भूत्वास्ते। तथाप्येवं वदति निजरक्षार्थमिष्टदेवतास्मरणं कुरु। इत्यस्य कुमारस्य हास्यलक्षणम्। यक्षोऽपि तत्कारणमवगम्याचिन्तयत्। अहो कुमारोऽयं योग्यो हसति। एतावति विपत्तिकाले को मे रक्षाक्षमो भवेदिति। हसित्वा प्रीतो भूत्वा कुमारं परोपकारिणं स्वगृहं प्रस्थापयामास। इतिवादिनि भूपाले वेतालः शिंशपावृक्षे पुनर्ललाग।

इति सप्तदशवेतालकथाप्रबन्धः।

[अष्टादशी कथा ।]

अथ राजा वेतालं शाखां शाखां भ्रामं संकद्ध्यैकशाखायां विधृत्य स्थितः। राजा प्रबन्धेनानेतुमक्षमो भूत्वा खड्गेन शाखामुच्छिद्य शाखासमेतं वेतालं स्कन्धे कृत्वा मौनपरायणो क्षान्तिशील-समीपं गन्तुमुपचक्रमे। तथापि वेतालः पुनर्गुरुवाक्यप्रश्नमकार्षीत्।

देव, विलासवती नाम नगर्यासीत्। तत्र रत्नदत्तो नाम वणिक् प्रतिवसति। तस्यानङ्गमञ्जरी नाम सुताऽभवत्। तस्या विवाहार्थे ताम्रलिप्तकानामनगर्यां रत्नदत्तो मनुष्यं प्रस्थापितवान्। अथ तत्पुर-निवासिनं कमलाकरनामानं द्विजपुत्रमवलोक्यानङ्गमञ्जरी कामपीडिता भूता। अथ तस्याः परां प्रीतिमुत्पाद्य स्वगृहं गन्तुमुद्यतो... तस्मिन् समये सा तस्य विरहमसहन्ती प्राणान्मुमोच। तां प्राणाधिकां तथाविधां विलोक्य कमलाकरोऽपि बहुविधं विलप्य प्राणांस्तत्याज।

ततो दयावती देवी तन्मिथुनं जीवयति स्म।

वेतालो वदति। वद राजन्। तयोर्मध्ये कस्यानुरागो महान्। राजा वदति। शृणु रे वेताल। कमलाकरस्यानुरागो महान्। यतः स्त्रीमरणमवलोक्यात्मनः प्राणांस्तत्याज। नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग

इत्यष्टादशवेतालकथाप्रबन्धः।

[एकोनविंशतितमी कथा।]

अथ राज्ञा पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, दक्षिणस्यां दिशि ब्रह्मपुराभिधेयं नगरं पुरासीत्। तत्र

विष्णुस्वामी नाम ब्राह्मणः प्रत्यवात्सीत् । सोऽतीवधनहीनः तस्य चत्वारः पुत्रा बभूवुः । कियता कालेन विष्णुस्वामिनि मृते ते चत्वारः प्राणरक्षार्थं मातुलालयमगमन् । मातुलोऽपि तान् दरिद्रानवलोक्य न संभवयामास । ततस्ते मर्तुमुद्यमं चक्रुः । ततः कोऽपि सुजनस्तान् मरणान्निवार्य ब्राह्मणकुमारा यूयं विद्याभ्यासं कुरुत, तदा सर्वसुखं भविष्यतीत्युवाच । तच्छ्रुत्वा मरणविधेर्निष्क्रम्य विद्याशिक्षार्थं गतवन्तः । अथैकदा विद्यां ज्ञात्वा सर्वे मिलित्वा जिज्ञासामारेभुः । अग्रजेनोक्तम् । अहं मृतास्थिसंचयनविद्यां जानामि । अपरेणोक्तम् । मांसशोणितसंचारविद्यां जानामि । अपरेणोक्तम् । नखकेशदन्तसंचयनविद्यां जानामि । चतुर्थेनोक्तम् । जीवयितुं जानामि । विद्याजिज्ञासाचिकीर्षवो सर्वे व्याघ्रास्थीनि समासाद्य व्याघ्रं जीवयन्ति स्म । ततः प्राप्तजीवेन व्याघ्रेण चत्वारो भक्षिताः ।

वद राजन् । तेषां मध्ये को वधभागी भवति । राजा वदति । शृणु रे वेताल । जीवदाता वधी भविष्यति । नृपताववितिवादिनि वेतालः शिंशपावृक्षे पुनर्ललाग ।

इत्यूनविंशतिवेतालकथाप्रबन्धः ।

[विंशतितमी कथा ।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति ।

देव, कलिङ्गविषये यज्ञस्थलं नामधेयं नगरमासीत् । तत्र यज्ञसोमनामा ब्राह्मणस्तिष्ठति । तस्य ब्राह्मणी सोमदत्ता । तस्यामनेन ब्रह्मस्वामी नाम पुत्र उत्पादितः । स सर्वशास्त्रतत्त्वज्ञोऽपि दैववशात् पञ्चत्वमगमत् । ततस्तत्पितरौ बहुविधं विलपन्तौ बन्धुजनसहितौ तमादाय श्मशाने सत्कारार्थमाजग्मतुः । इत्येवकाले श्मशानवासी

योगी तं शरीरं द्विजकुमारं सर्वशास्त्रवेत्तारं मनोहरमयुक्तकालेमरण-मालोक्य करुणस्वरेणोच्चैः क्रन्दितवान्, परमकौतुकेन नर्तितवांश्च। सहसोत्थाय योगेन जीर्णशरीरं परित्यज्य मृतस्य द्विजकुमारस्य शरीरं प्रविवेश। कुमारः सुप्तोत्थितो भूतः। तत्पितरौ परां प्रीतिमासादितवन्तौ। सर्वे बन्धुवर्गा हर्षिता बभूवुः। ब्रह्मस्वामी प्राप्तजीवनः सर्वभोगं परित्यज्य योगं ध्यायंस्तस्थौ।

श्मशानवासी योगी कथं चक्रन्द कथं वा ननर्त। तत्कारणं वदतु देव। राजा वदति। शृणु रे वेताल। चिरकालमुपार्जितं शरीरं त्यक्तव्यमिति चक्रन्द। जीर्णशरीरं विहाय सर्वगुणाधारं द्विजशरीरं प्राप्तव्यमिति कृत्वा ननर्त। नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

इति विंशतिवेतालकथाप्रबन्धः।

[एकविंशतितमी कथा।]

अथ राज्ञा पुनरानीयमानो वेतालः कथामपरां कथयति।

देव, दक्षिणस्यां दिशि विक्रमबाहुर्नाम राजा बभूव। तस्य राज्ये पुष्करावती नाम नगरी स्थिता। तत्र जितकुबेरविभवो वणिङ्निधिपतिदत्तो नाम सार्थवाहस्तस्थौ। तस्य कामसेना वासवदत्ता क्षमावती चम्पावती नाम चतस्रः पत्न्यो बभूवुः। तासु तेन रत्नदत्त-मणिदत्तकुमारदत्तकनकदत्तनामानश्चत्वारः पुत्रा उत्पादिताः। तत्र रत्नदत्तेन गान्धर्वशास्त्रमभ्यस्तम्। तत्समो महीमण्डले नृत्यगीतादिभिः कोऽपि न विद्यते। मणिदत्तेनास्त्रविद्याभ्यस्ता। तत्समोऽस्त्रविन्मही-मण्डले कोऽपि नास्ति। कुमारदत्तेन नानाशास्त्रकथाभ्यस्ता। तत्समो

धीमान्महीमण्डले कोऽपि नास्ति। कनकदत्तेन मानानीतिशिक्षाभ्यस्ता। तत्समो नीतिमान् नास्ति। ते चत्वारः सर्वगुणान्विता देवसौन्दर्य-निर्जितमन्मथाः कामिनीजनमनोहारिणो विश्वाविख्यातपौरुषाः सपत्नीकाः सकलसुखमनुभवन्तस्तस्थुः।

कियति काले तेषां पिता लोकान्तरमगमत्। अथ विधिवशात्ते चत्वार एकात्मका आत्मस्त्रीकलहात् पृथक्त्वमन्वभवन्। प्रीत्या सर्वाणि कोटिसंख्यानि धनानि विभक्तानि। किं तु दिव्यरत्नत्रयं सामान्येन स्थितम्। निधिपतिदत्तेन पूर्वमाज्ञा विहिता। यदि चतुर्णां पृथक्त्वं स्यात् तदा मत्सखा विक्रमबाहुरिदं रत्नत्रयं यस्मै ददाति स एव प्राप्स्यति। इति पितुर्वचनं स्मृत्वा राज्ञः स्थाने ते चत्वारो जग्मुः। राजा च बन्धुपुत्रान् दृष्ट्वा तानुवाच। भो बन्धुपुत्राः, किमर्थमत्रागमनम्। इति पृष्टास्ते पितुर्वचनं ज्ञापयामासुः। राजा रत्नत्रयमालोक्य विस्मितो भूत्वेदमचिन्तयत्। दिव्यरत्नत्रयमिदमद्भुतं बन्धुपुत्राणां मध्ये यो मतिमांस्तस्मै दातव्यम्। ततोऽमीषां भाजनता परीक्ष्यताम्। इति कृत्वा तानुवाच। भो सुहृत्पुत्राः, मया यत्र रत्नत्रयपरिच्छेदः क्रियते तत्र भवद्भिर्न स्थातव्यम्। तच्छ्रुत्वा ते वदन्ति। यदाज्ञापयति देव तेनैवास्माभिः स्थातव्यमिति। एतावन्तो वा प्राणाः कस्य सन्ति यो देववचनलङ्घनं करिष्यति। राजा वदति। एतानि रत्नानि सामान्येनात्र सन्तु। कुसुमपुरनगरे रूपवतीनामधेया त्रैलोक्यमोहनीयाकृतिर्वेश्या विद्यते। सा लक्षमेकमादायैकरात्रिक्रीडां पुरुषेण सह करोति। यदि लक्षसहस्रं प्राप्नोति तथापि नापरदिनं रमते। तया वेश्यया सह यो द्विरात्रिक्रीडां कर्तुं शक्नोति तस्यैतानि रत्नानि भवन्ति। तच्छ्रुत्वा तैरुक्तम्। देव, केनाग्रतो गन्तव्यम्। तमाज्ञापयतु देव। राजा वदति। ज्येष्ठानुक्रमेण गमनमनुभवति।

ततो रत्नदत्तोऽनेककरितुरगमणिमाणिक्यबहुविधसामग्रीं सुवर्ण-

रत्नानि गृहीत्वा पुरन्दरकल्पः कुसुमपुरं गत्वा नृत्यगीतवाद्यादिभिर्महारम्भमकरोत्। लक्षसंख्यसामग्रीं दत्वा विचक्षणपुरुषमेकं रूपवत्याः परिचयार्थं प्रस्थापयमास। ततः सा ससामग्रिकं तमालोक्य विस्मिता चिन्तितवती। अहो एतावदुत्सुकता कस्यापि न दृष्टा। तदवगृह्य वचनामृतेन समाश्वासयामास। ततः प्राप्तप्रश्रयो विचक्षणस्तामब्रवीत्। रूपवति, कामदेवकल्पेन पुरुषेण सहापरिभवता रत्नदत्तेन क्रीडतु भवती। रूपवती वदति। धन्याहं यतस्तस्यानुरागो मयि भूतः। तद् भवांस्तमादाय शीघ्रं समागच्छतु। तस्य महापुरुषस्य क्रीडायोग्या भवामि। तदा लक्षमेकं दत्वा मया सह क्रीडयिष्यति। इत्युक्त्वा तया प्रस्थापितः स रूपवत्या वचनं रत्नदत्ताय कथयामास।

ततो हर्षितो रत्नदत्तो रात्रौ रूपवत्याः समीपं जगाम। तया सह विशेषक्रीडामाचर्य द्वितीयदिनक्रीडार्थं निजगुप्तप्रकटनं कृतम्। रत्नदत्तस्य यन्नृत्यगीतादिकं द्रष्टुं श्रोतुं देवगन्धर्वकिन्नरा अपि पृथिव्यामवतरन्ति तच्छ्रुत्वा सा रूपवती क्रन्दति। तदा रत्नदत्तो वदति। प्राणाधिके कथमकारणं रोदिषि। इति पृष्टा ब्रूते। प्राणेश्वर, भवता पुरुषवरेण सह मम क्रीडापरदिवसे न भविष्यतीति रोदिमि। तेनोक्तम्। कथमेतत्। वेश्या ब्रूते। लक्षमेकं गृहीत्वैकरात्रिक्रीडामहमाचरामि। कुमारेणोक्तम्। अपररात्रौ क्रीडार्थमहं लक्षत्रयं दास्यामि। वेश्या ब्रूते। लक्षसहस्रेणापि द्वितीयरात्रिक्रीडामहं न करोमि। ममैषा प्रतिज्ञैव विद्यते। नानायत्नेनायं निरस्तो रत्नदत्तः सुदुःखितो भूत्वा मूर्छित इव निर्जगाम। तत्र गत्वा विक्रमबाहुनृपतिं ज्ञापयामास। देव, कस्तया सह द्वितीयरात्रिक्रीडाशूरो भविष्यति।

अथ मणिदत्तो बहुमणिरत्नाविभवसहितः कुसुमपुरं गत्वा तत्पुरनृपतेर्दर्शनमकरोत्। राज्ञा च तस्य दर्शनमधिगम्य बहुतरमानं

कृत्वा स्थापितः। अथ विपक्षनृपतिरेक इमं कुसुमपुराधिपतिं जेतुमागत्य समस्तसैन्यकरितुरगं जित्वा राजानमपि जेतुमायाति। तदानीमनेन मणिदत्तेन प्रतिज्ञातम्। देव, विपक्षनृपतिरयं संग्रामे जित्वा मयानेतव्यः। इति प्रतिज्ञाय गत्वा तं विजित्य नृपतेरग्रतो दत्तवान्। तदारभ्य तत्समः कर्ता कुसुपुरे कोऽपि नाभूत्। अथ नानापौरुषं प्रकाश्य तया वेश्यया सह कन्दर्पक्रीडामकरोत्। एतावता पौरुषेणापि द्विरात्रिक्रीडाक्षमो नाभूत्। तदा सुदुःखितो भूत्वा वृत्तान्तं विक्रमबाहुं ज्ञापयामास।

अथ कुमारदत्तोऽपि तत्र गत्वा तया सह क्रीडामाचर्य द्वितीयरात्रिक्रीडार्थं महारत्नत्रयलोभकथामप्यकथयत्। तथापि तया निरस्तः स्वदेशमागत्य राजनि ज्ञापयामास।

अथ कनकदत्तोऽपि मनसाऽचिन्तयत्। पराक्रमवन्तोऽतिसुन्दरा अकृतकार्या निराश्वासा भूताः। तन्मया गत्वा किं कर्तव्यम्। अथारम्भप्रयोजनाभावः। तदहं किञ्चिच्छम्बलमादायैकसेवको भूत्वा तस्याश्चेष्टां निरूपयामि। इति विचिन्त्य तत्र गत्वा तच्चेष्टां जिज्ञासुरास्ते। एतस्मिन् समये सा रूपवती वेश्यासहस्रपरिवृता राजपथे गच्छन्ती विद्यते। तां विद्याधरीमिवालोक्य कनकदत्तेन पश्चाद्दासीवेश्यैका पृष्टा। भवति केयं याति। तयोक्तम्। कुमार, इयमेव रूपवती वेश्या। कनकदत्तो वदति। कुत्र गच्छतीयम्। सा ब्रूते। नगरैकान्ते शिवायतने पुण्यशरीरा नामैका तपस्विनी गुरुरस्या विद्यते। तस्याः सेवामियं सततमेव करोति। तदा कनकदत्तोऽचिन्तयत्। मदीयकार्यसिद्धिर्भूतेति। तदेवाहं तामनुगच्छामि।

अथ तां तापसीं सम्भाष्य रूपवत्यां स्वगृहमायातायां कनकदत्तः पुण्यशरीराया दर्शनमकरोन्ननाम च। तया पृष्टः। को भवान्। स वदति। देशान्तरीयराजपुत्रोऽहम्। तापसी वदति। वत्स,

किमर्थमागतोऽसि । तेनोक्तम् । मातस्तव सेवां कर्तुमागतोऽस्मि । तया वचनामृतेनाश्वास्य कनकदत्तः प्रस्थापितः । किन्तु रूपवती यदायाति तदायमन्यत्र गत्वा तिष्ठति । एवं षण्मासे गतैकदा सन्तुष्टया तया पृष्टः । वत्स, किमर्थं मदीयसेवा महती क्रियते भवता । प्रीताऽस्मि । तद्‌भवानभीप्सितं वदतु । तन्मया कर्तव्यम् । तेनोक्तम् । मातस्तन्मया रहसि वक्तव्यम् । ततः सा परिवारं दूरं प्रस्थाप्य पुनर्वदति । वत्स, कथ्यतां निजाभिलषितम् । कनकदत्तो वदति मातर्दिनान्ते या रूपवती ते सेवां कर्तुमायाति सा लक्षमेकं गृहीत्वा पुरुषेणैकरात्रिक्रीडां करोति । लक्षसहस्रेणापि परदिनक्रीडां कथं न करोति तत्कारणं ज्ञातुमहं तव सेवां करोमि । सा ब्रूते । किं सा समायाता मया प्रष्टव्या । तदात्र मण्डपैककोणे गूढेन रूपवतीमुखाच्छ्रोष्यासि । ततोऽयमतिप्रीतोऽभवत् ।

अथ परदिने रूपवती तापसीगृहमागता । तामालोक्य कनकदत्तः तद्‌गृहकोणे सुगूढेन लुक्कायितः । रूपवती पुण्यशरीरायाः सेवां कृत्वा तया सहाशेषालापं कुर्वाणावतिष्ठते । अथ प्रस्तावावसरमासाद्य तापसी रूपवतीमाह । पुत्रि, परंपरया मयेति श्रुतम् । लक्षमेकमादाय दिव्यपुरुषेण सह भवत्येकरात्रिं क्रीडति । लक्षसहस्रेणापि तेन सह द्विरात्रिक्रीडां न करोति । तत्कारणमहं श्रोतुमिच्छामि । त्वयावश्यं कारणं वक्तव्यम् । तदैवाहं प्रीता भवामि । रूपवती ब्रूते । देवि, तद् गोप्यं वक्तुं न शक्नोमि । तापसी वदति । पुत्रि, यदि त्वया तत्कारणं मयि न वक्तव्यं तदाहमप्रीता भवामि । रूपवती ब्रूते । मातर्यदि तत्कारणमवश्यं वक्तव्यं तदा सत्यं कुरु । तत् कुत्रचिन्न वक्तव्यम् । तापसी वदति । पुत्रि, यदि तत्कारणं कुत्रचित् कथयामि तदा सत्यभ्रष्टा भवामि । रूपवती ब्रूते । शृणु मातः । तापसी वदति । सावधानास्मि । कथयतु भवती । रूपवती कथयति ।

पद्मपुरनामनगरे प्रचण्डसेनराजा तस्थौ । तस्य राज्ञः सान्धि-

विग्रहिकस्य विचित्रदत्तनाम्नो दुहिताहं गौरीव्रतपरायणा । ततः स देवी प्रसन्ना वरमदात् । पुत्रि, त्वं मत्प्रसादात् सौभाग्यवती भविष्यसि, योग्यमेव पतिं प्राप्स्यसि, जातिस्मरा च भविष्यसि । इत्येव काले तस्य राज्ञः पुत्राय प्रतापसेनाय मत्पिता मां विवाहेन दत्तवान् देवीवरप्रसादेन तस्याहं प्राणेभ्योऽपि गरीयसी भूता । राज्ञा विपक्ष नृपतिनिराकरणार्थं मत्पतिः प्रस्थापितः । स मया विना क्षणमपि न जीवति । तत्रापि मया सह जगाम । अथ बलवता विपक्षनृपतिन समासाद्य मत्पतिस्त्रासितः । सहसा भयान्मां प्राणाधिकामपि परित्यज्य देशान्तरमगमत् । तस्मिन् समये हस्तिनीस्कन्धसमारूढेन विपक्षेणाहं प्राप्ता चिन्तयामि । पुरुषं धिगस्तु यतः सर्वलक्षणसम्पन्न परित्यज्य निर्गतः । मां त्रैलोक्यमोहनीयाकृतिमासाद्य विपक्षनृपति कथं त्यक्ष्यति । तद् मम सतीत्वनाशेन भवितव्यम् । इति विचिन्त्याहं प्रतापसेनं ध्यायन्ती प्राणांस्तत्याज ।

मरणसमये मया करिणीमुखमालोकितम् । तेन कारणेन करिणी भूताहम् । करिण्यपि भूत्वा प्रतापसेनं ध्यायन्ती काल नयामि । मत्तकुञ्जरा मां क्रीडार्थमायान्ति । तानहं निराशान् करोमि कमपि न भजामि । अथैकदा मत्तकुञ्जरो भूत्वा प्रतापसेनः समागतः । तमहं जातिस्मरत्वाज्ज्ञात्वा भजामि स्म । तदारभ्य तेन सह नानासुखमनुभवन्ती तिष्ठामि स्म । इत्येव काले गजबन्ध एकस्तत्रा गत्य मिलितः । तदानीमपि स गजरूपाश्रितः प्रतापसेनः सहसा म विहाय वनान्तरमगमत् । ततोऽमीभिर्नीत्वाहं राज्ञे दत्ता । सोऽपि राजा मां प्रधानकरिणीमकरोत् । अथैकदा राजा मामारुह्य मृगान्वेषणाय गतः । तदानीमहं मत्तकुञ्जररूपं ध्यायन्ती प्राणांस्तत्याज ।

मरणकाले मया मृगी समालोकिता । तेनाहं मृगी भूता तत्रापि प्राप्तयौवना कमपि मृगं न भजामि । तमेव ध्यायन्ती तिष्ठामि

अथैकदा तस्मिन्नरण्ये भ्रमन्ती मृगमेकमपश्यम्। पुण्येन मया ज्ञातः स एव प्रतापसेनो गजत्वं विहाय मृगत्वमासादितवान्। तमहमभजम्। तदारभ्य तेन सह नानासुखमनुभवामि स्म। अथ दावाग्निना तस्मिन् वने दह्यमाने मां विहाय सोऽपि वनान्तरं गतः। अहमन्यवन आगन्तुमशक्ता तं ध्यायन्ती प्राणांस्तत्याज।

मरणसमये तत्र सरस्तीरे मयैका चक्रवाकी दृष्टा। तेनाहं चक्रवाकी भूता। तत्र जाता कमपि न भजामि। तमनुध्यायन्ती तिष्ठामि। अथ विधिवशात् स प्रतापसेनो मृगत्वं विहाय चक्रवाकत्वमासाद्य मत्समीपमागतः। तं प्राप्य तेन सह नानासुखमनुभवन्ती तिष्ठामि। एकदा कुसुमपुरान्तर्गतसरोवरमागताहम्। तत्र व्याधसमूहं दृष्ट्वा मां त्यक्त्वा पलायितः। तदाहं व्याधेन प्राप्ता। तं ध्यायन्ती जीवितं जहौ।

मरणसमये कुसुमपुरनिवासिनी जलक्रीडां कुर्वाणा वरेण्या वारवनिता मयालोकिता। तेनाहमपि वारवनितायोनौ जातास्मि। ततो यौवनं प्राप्य मया चिन्तितम्। पुरुषा निर्दयाः स्नेहहीना यतश्चतुर्षु जन्मसु मामनुरक्तां विहाय प्रतापसेनः पलायितः। इति कोपेन मया प्रतिज्ञा कृता। एकरात्रभोक्तव्यः पुरुषः। द्वितीयरात्रे न भोक्तव्यः। मातः, कारणमेतत्।

तापसीं रहस्यं श्रावयित्वा प्रणम्य वेश्याशतपरिवृता स्वगृहमागता। अथ कियता कालेन कनकदत्तस्तापसीं प्रणम्य वेशधरो रूपवतीगृहं त्यक्त्वा प्रतिवेश्यागृहं बभ्राम। किं तु कयापि सह न रमते। सर्वासु वेश्यासु कथयतीदम्।

पद्मपुराधिपतिप्रचण्डसेनस्य पुत्रः प्रतापसेनोऽहम्। विचित्रदत्तस्य कन्या मम पत्नी स्थिता। सा मम प्राणाधिका। विपक्षभयात् तामपहायाहं पलायितः। तदा सा मृता करिणी भूता। अहमपि

गजत्वमासाद्य तया सह विविधक्रीडां कृत्वा गजबन्धकारिभयात् तामपहायान्यत्र वने गतः। सा बन्धनस्थापि मां ध्यायन्ती जीवनं तत्याज। तदा मृगी भूता। तदा तस्याः शोकेन मृगत्वमहमासाद्य तया सह क्रीडां कृत्वा दावाग्निभयादहमन्यत्र गतः। सा मां ध्यायन्ती चक्रवाकी भूता। तदाहमपि मृतश्चक्रवाकत्वमासाद्य तया सहाशेष-क्रीडामकार्षम्। एकदा तामादाय कुसुमपुरसरोवरमागतः। व्याध-भयादहं पलायितः। सा व्याधेन प्राप्ता मां ध्यायन्ती मृता मनुष्ययोनौ जन्म लब्धवती। तदाहमपि चक्रवाकशरीरं विहाय मानुषो भूत्वा तामेव ध्यायंस्तिष्ठामि।

पटे तत् सर्वं लिखित्वा सर्वासां वारवनितानां हस्ते दत्वा तत्रैव नगरे तिष्ठति। अथ रूपवती परस्परया वार्तामेतामाकर्ण्य कनकदत्तमात्मभवनं नीत्वा समस्ततत्त्वं विज्ञाय कनकदत्तस्य कण्ठे लगित्वोच्चैश्चक्रन्द। ततः सर्वे लोका विस्मिता बभूवुः। ततो रूपवत्या सहानुरागः कनकदत्तस्य बभूव। तदारभ्य तया रूपवत्या समधिगत-प्रतापसेनानुरागया मुक्तप्रतिज्ञया सह कनकदत्तो विविधसुखमनु-भवंस्तिष्ठति। ततो दिनकतिपयं विलम्ब्य कनकदत्तो रूपवतीमवादीत्। भो वल्लभे, मम पुष्करावती नाम नगरीन्द्रस्यामरावतीवास्ते। तत्र गत्वा भवत्या प्राणाधिकया सह सुखमनुभवामि। रूपवती ब्रूते। प्राणेश्वर, तवाज्ञा मया सदैव कर्तव्या। ततस्तां सकलवित्तसमेतां रूपवतीमादाय स्वदेशमागत्य रहसि तं विक्रमबाहुं सकलमेव वृत्तान्तं कथयामास। तच्छ्रुत्वा राजा मनसेत्यचिन्तयत्। किमाश्चर्यमेतत्। अनेकविचक्षणा अस्या द्विरात्रिक्रीडाक्षमा न भूताः। अयमिमां गृहीत्वा समायातवान्। तदहमिमं कनकदत्तं सान्धिविग्रहिकं करोमि। ततस्तानि रत्नानि कनकदत्ताय राज्ञा दत्तानि। बहुतरं प्रसादं दत्वा सान्धिविग्रहिकश्च कृतः।

वेतालो वदति। वद राजन्। प्रतिजन्मनि तया निजपति-

ज्ञातः । सा जातिस्मरापि कथं कनकदत्तं न ज्ञातवती, यतस्तस्य मायाप्रबन्धः सफलोऽभूत् । राजा वदति । शृणु रे वेताल । प्रतिजन्मनि तया निजपतिना सह क्रीडाचरिता । तेन पुण्येन तया निजपतिरेव ज्ञातः । वेश्याकुले जन्म लब्ध्वा पापिष्ठा भूता । अन्यपुरुषयोगाज्जातिस्मरापि निजपतिं विस्मृतवती । नृपतेर्मौनभङ्गं विधाय वेतालः शिंशपावृक्षे पुनर्ललाग ।

इत्येकविंशतितमो वेतालकथाप्रबन्धः ।

[द्वाविंशतितमी कथा ।]

अथ राज्ञा पुनरानीयमानो वेतालः प्रश्नमकार्षीत् ।

देव, कुण्डिनपुरनाम नगरमासीत् । तत्र परमधार्मिको राजा श्वेतकेतुर्बभूव । तस्य प्राणसमः सखा शङ्करदत्तो वणिगासीत् । तेन सार्थवाहेन तत्पुरनिवासिनो मणिदत्तस्य दुहितानङ्गसेना परिणीता । अनया सह शङ्करदत्तो नानासुखमनुभवंस्तिष्ठति । एकदायं श्वेतकेतुनृपतौ कुटुम्बं समर्प्यानङ्गसेनायास्त्रैलोक्यमोहनीयाकृतेः परिरक्षणाय सहस्रशः पदातिकान् दत्वा निर्बन्धमाचर्य वाणिज्यार्थं देशान्तरमगमत् । द्वादशवर्षेषु नागतः । तदा तद्विरहेऽनङ्गसेना कृष्णपक्षस्य चन्द्रलेखेव भवन्ती विद्यते। अथ मदनचतुर्दशी समागत्य मिलिता। तस्यां कन्दर्पमाराधयितुं बहुशः स्त्रियः पुरुषा यान्ति । ततो मणिदत्तस्य पत्नी दुहितरमब्रवीत् । पुत्रि, त्वमेव शङ्करदत्तस्यागमनाय कामदेवार्चनमाचर । तच्छ्रुत्वा पदातिकान् समादाय दासीशतपरिवृता गत्वा मदनार्चनं कृत्वा पितृगृहं समागच्छन्ती विद्यते ।

ततः शशिदेवो धूर्तवरस्तामालोक्य कामपीडितोऽभवत् । कथ-

मपि पद्मावतीनगरीं गत्वा मूलदेवाय वृत्तान्तमवादीत् । तच्छ्रुत्वा मूलदेवो ब्रूते । सखे, शशिदेव, कातरो मा भव । सा येन भवता प्राप्यते तन्मया कर्तव्यम् । शशिदेवेनोक्तम् । देव, पदातिकास्तां रक्षन्ति । अतोऽपि पितरौ रक्षणमपि न त्यजतः । राजा श्वेतकेतुरस्या रक्षणाय सयत्नः । तत्कथमेतच्छक्यं भवति । मूलदेवो वदति । तव का चिन्ता । मित्र, अत्र नगरे कामिकल्पलता नाम कुट्टिनी विद्यते । सारुन्धतीमपि चालयितुं समर्था । तस्मादावां गत्वा तस्यां निवेदयिष्यावः । इत्यालोच्य गत्वोक्तवन्तौ । तयोक्तम् । शशिदेवमूलदेवौ, अनङ्गसेनामहमपि जानामि । किन्तु दुष्कर एव कर्मप्रवेशः । भवतु । तथापि गत्वा भवतोः प्रीतिर्वाचनीया । किन्तु युवां गत्वानुपलक्षितौ स्थास्यथः । अहं शिवसेवां कुर्वती स्थास्यामि । निजप्रभुत्वं प्रकाश्य पश्चादुपायं करिष्यामि ।

ततः परिचारिकाद्वयमासाद्य तत्र गत्वा शिवसेवामाचरन्ती विद्यते । ततस्तस्या महती सिद्धिर्भूता । सर्वैरुच्यते । सर्वज्ञेयं तापसीति । श्रुत्वानङ्गसेना मातरमब्रवीत् । मातर्जामातुर्वार्तां सर्वज्ञास्थाने गोचरीकुरु । सा ब्रूते । पुत्रि, भद्रं स्मारितम् । ततः सा गत्वा सामग्रीं दत्त्वा प्रणम्येदमभ्यधात् । मातः सर्वज्ञे, मम जामाता द्वादशभिवर्षैर्नायातः । कथमस्य तत्त्वम् । मयि कथ्यताम् । बहुतरधनं दातव्यम् । तापसी वदति । मयावश्यं वक्तव्यम् । अद्यैव गृहं गच्छ । विचिन्त्य मया तस्य तत्त्वं किञ्चिद्वक्तव्यम् । किन्त्वनङ्गसेनामप्यत्रानेष्यसि ।

अथापरदिने दुहितरमादाय सपत्नीको मणिदत्तः समागतः । सामग्रीं दत्त्वा प्रणम्योवाच । मातः सर्वज्ञे, अनङ्गसेनामादाय भवत्याः स्थाने सपत्नीकोऽहमागतः । शङ्करदत्तस्य कारणं वदतु भवती । निर्बन्धातिशयेन सा ब्रूते । मणिदत्त, तव जामाता तत्र कन्यामेकां त्रैलोक्यमोहनीयाकृतिं परिणीतवान् । तच्छ्रुत्वा पितरौ सर्वज्ञाचरणे

पतितावुक्तवन्तौ च । मातः, शङ्करदत्तस्तां कन्यां विहायात्र केन प्रकारेण समागमिष्यति तद्वदतु भवती । सा ब्रूते । मणिदत्त, मन्त्र एको विद्यते । किन्तु सुदुर्लभो दातुमशक्यः । तच्छ्रुत्वा तौ वदतः । तापसि, यदि भवत्या स मन्त्रो न दीयते तदानङ्गसेनेयं तद्विरहे मरिष्यति । तदास्याः शोकेनावामपि मरिष्यावः । तद्वधभागिनी भवती भविष्यति । इत्युक्त्वा तस्याश्चरणे पुनः पतितौ ।

ततः सा ब्रूते । तस्मिन् मन्त्रेऽशक्यमेकमस्ति । यदि तव पुत्री तत्करोति तदैव मन्त्रसिद्धिर्भवति । तदा ताभ्यामुक्तम् । भवती यामाज्ञां चरति सापि तां करिष्यति । ततो मणिदत्तपत्नीं रहसि नीत्वा निगदितवती । शृणु निभृतमण्डपं कृत्वा तत्रानङ्गसेनानीयमानं पुरुषं पश्यन्ती मन्त्रं जापिष्यति । सुरतसम्भोगं तत्र नेष्यति तेन पुरुषेण प्रतिदिनम् । स पुरुषोऽपि शङ्करदत्तसदृशो यदा भवेत्तदैव तस्यागमनं भविष्यति । तच्छ्रुत्वा सा ब्रूते । गत्वा स्वामिनं पृच्छामि । तया पृष्टो मणिदत्तो ब्रूते । वल्लभे, येनोपायेन जामाता समायाति तमेव करोतु भवती । तदा तयोक्तम् । तव द्वार्यनेकपदातिकाः सन्ति । मन्त्रजाप्यसमये तत्र गन्तुं न शक्यते । मणिदत्तो ब्रूते । तव गमने विरोधं कोऽपि न करिष्यति । मयाद्य सर्वे ज्ञापयितव्याः । भवत्या यातायातं सुखेन भविष्यति । ततो मणिदत्तो गत्वा मण्डपमेकमकरोत् । इयं तापसी घोटकदोलया गत्वा तेनैव विधिनानङ्गसेनां मन्त्रं जापयति । तया सह कामिकल्पता कथालापं कुर्वती नित्यमेव तिष्ठति ।

अथैकदा तापसी तामनङ्गसेनामभ्यधात् । पुत्रि, त्वमीदृशीं दशां कुतो गतासि । त्वामतीवकृशतनुं दृष्ट्वा तव दुःखेनाहं महती दुःखिता । तद्वदतु भवती । अनङ्गसेना ब्रूते । मातर्यावन्मम पतिर्वाणिज्यार्थं गतस्तदारभ्य पुरुषच्छायामपि न पश्यामि । इदानीं मन्त्रजाप्यसमये

पुरुषं दृष्ट्वा पतिक्रीडां स्मरामि। तच्छ्रुत्वा तापसी ब्रूते। यद्येवं तमेव वरय। सा ब्रूते। यद्येवं तदा भवती तमिदं वदतु। तापसी वदति। स मया तुभ्यं दत्तः। सुखात् सुखमाचरति भवती। सा ब्रूते। एतदन्यं न ब्रवीतु भवती। ततो हर्षिता भूत्वा कामिकल्पलता शशिदेवाय रहस्यं निगदितवती। तच्छ्रुत्वा शशिदेवः प्राप्तजीवन इवाभूत्। अथ तयानङ्गसेनया सह विविधक्रीडां कुर्वाणस्तिष्ठति। अनङ्गसेनापि पण्डितं शशिदेवं प्राप्य शङ्करदत्तं विसस्मार। तापसी मन्त्रजाप्यच्छलेन शशिदेवक्रीडार्थं नित्यमेव यातायातं करोति।

अथैकदा मूलदेवः शशिदेवमब्रवीत्। सखे, अत्र स्थित्वा प्रयोजनाभावः। तस्मादनङ्गसेनामादाय स्वदेशे गम्यताम्। शशिदेवो वदति। कथमेतच्छक्यम्। मूलदेवो वदति। तव वचनेन सातीवरागवती। यद्वदिष्यासि सा तत् करिष्यति। ततो दोलया साऽत्रागमिष्यति। तदा मयोपायः कर्तव्यः। ततः शशिदेवो गत्वानङ्गसेनां मूलदेवोपदिष्टं कथयामास। सा तदप्यङ्गीकृतवती। मूलदेवः सहसा भटशतैकमादाय राजद्वारं समागत्य शशिदेवसदृशो भूत्वा दोलारूढां तां निरीक्ष्य तस्या वस्त्रे धृत्वा वदति स्म। त्वं मम भार्या प्राणाधिका। कथं प्रपलाय्य यासि। तदा रक्षका जना अनङ्गसेनायाश्श्रेष्ठां मणिदत्ताय कथयामासुः। तच्छ्रुत्वा मणिदत्तो गत्वा राजानं ज्ञापयामास। राजा च मित्रपत्नीविडम्बनामधिगम्यानङ्गसेनामात्मसमीपमानीय वदति। रे रे निर्लज्ज, मम मित्रपत्न्यनङ्गसेना त्वया पत्नीं वदित्वा कथं धृता। अस्याः पिता मणिदत्तः ख्यात एवास्ते। तत्कथमेतद् वदसि। याहि याहि। त्वामहं व्यापादयामि। किं करोमि। यज्ञोपवीतमास्ते। श्वेतकेतुरहं तेन वक्ष्यामि। ततस्तेनोक्तम्। चिरप्रवासिना मयालोक्य धृतेयम्। ततोऽहं मम पत्नीमानीयावश्यं नृपतिं दर्शयिष्यामि। तदैव ममैषाकीर्तिः पलायिष्यते। इति वाक्येन सर्वान् सन्तोष्य गतः।

गत्वा कामिकल्पलतामाह। मातर्यदि त्वं मन्यसे तदानङ्गसेना-मादाय गच्छामः। तयोक्तम्। कथमेतच्छक्यम्। मूलदेवो वदति। मातः सातीवरागवती शशिदेववाक्याद्यास्यति। किन्तु तस्या अकीर्तिर्लोके स्थास्यति। एका मृता स्त्री मयानेतव्या। गन्धचन्दनहरितालादिभिस्तां परिमार्ज्योदाय दोलयानीत्वा शशिदेवेन सह तत्र भवती यास्यति। गत्वानङ्गसेनायाः सर्वाभरणं तस्यां दत्त्वानङ्गसेनायाः शय्यायां शाय-यित्वा भवत्यात्र गन्तव्यम्। ततः शशिदेवस्तद्गृहेऽग्निं दत्वानङ्गसे-नामादाय पलायिष्यते। तदानङ्गसेनायाः सर्वाभरणेन युतां तामालोक्य सर्वेऽनङ्गसेनाज्ञानं तस्यामेव करिष्यन्ति। ततः कैश्चिदपि न वक्तव्यम्, अनङ्गसेना परपुरुषमादाय पलायितवती। अथ मूलदेवोपायेन तथाविधं कर्माचर्य तामादाय स्वदेशमगमच्छशिदेवो मूलदेवेन सह।

अथापरदिने तन्मातापितरौ बहु विलपन्तौ तिष्ठतः। राज्ञा स्वयमागत्य तस्यास्थीनि मित्रस्नेहाम्नानातीर्थे प्रस्थापितानि। तापसी हा हा कृत्वा विलपन्ती वदति। अस्मिन् देशे न स्थातव्यम्। अनङ्ग-सेना प्रियशिष्या मृतेत्यहमन्यत्र यामि। इति निगद्य पद्मावत्यां नगर्यां ययौ। अथ कियता कालेन मूलदेवोऽनङ्गसेनामादाय शशिदेवसहि-तस्तां राजानं दर्शितवानुवाच। मत्पत्नीमनङ्गसेनाकारां पश्यतु देवः। अस्याः सादृश्यमोहेन पुरानगङ्गसेना धृता। ततस्तामालोक्य राजा विस्मितो वदति। अहो साक्षादनङ्गसेनेयम्। ततो राजा प्रसादं दत्वा प्रस्थापितवान्। अनङ्गसेनाया मातापितरौ तां दुहितरमेवालोक्यान-ङ्गसेनायाः सर्वाभरणं तस्यै ददतुश्चक्रन्दतुश्च।

वेतालो वदति। वदतु देव। कामिकल्पलताया महती बुद्धिः किं वा मूलदेवस्य। राजा वदति। शृणु रे वेताल। मूलदेवो महान् धूर्तः सर्वत्रोत्पन्नबुद्धित्वात्। इति राजानं वञ्चयित्वा वेतालः शिंश-पावृक्षे पुनर्ललाग।

इति द्वाविंशतिवेतालकथाप्रबन्धः।

[त्रयोविंशतितमी कथा ।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति ।

देव नर्मदातरङ्गिणीतीरे एकचक्रवर्तीनामधेया नगरी स्थिता। तस्यामरिमौलिमणिर्नाम राजा बभूव। एकदा महानेको जन्तुरागत्य स्रोतसि मिलितः । पुरजनैः कुतूहलेन स मारितः । तस्योदरे त्रैलोक्यमोहनीयाकृतिरेका कन्या प्राप्ता । सहसा सर्वे तद्वृत्तान्तं राजानं ज्ञापयामासुः। राजा तत्रागत्य विविधसौहृदमाचर्य पप्रच्छ । हे कन्यके, का त्वम् । किमर्थमीदृशीं दशामागतासि । पृष्टा ब्रूते। देव, नृपमणिमुकुटस्य राज्ञः कन्याहं शोभावती नाम । सखीशतपरिवृतया जलक्रीडार्थं मया नद्या जले समायातम्। तदानीमहमनेन प्राप्य गिलिता । स्वप्ने स्थितेव भूतास्मि । मम पितुर्देशः कुतः । अहं वा क्व। एकमपि न जानामि। तच्छ्रुत्वा राजा वदति । कन्यके पूर्वमेव तवविवाहार्थं नृपमणिमुकुटो राजा मम स्थाने मनुष्यं प्रस्थाप्य स्थितः । तच्छ्रुत्वा सा वदति । देव, भवतः किं नाम । राजाह । अरिमौलिमणिर्नृपतिरहम् । सा ब्रूते ममाभिलषितसिद्धिरकारि । ततो राजा तस्याः पाणिग्रहणचिकीर्षुरभवत् ।

तदवगम्य प्रच्छन्नरूपिणा राक्षसेनोक्तम्। कथमिमां शोभावतीं नेष्यसि। पित्रा सहाहमिमां खादिष्यामि। तद्यदि स्वकीयजीवितमिच्छसि तदस्याः पाणिग्रहणं मा कुरु । मम पिता कुम्भीररूपेण माता जलौकारूपेण विद्यते। कृकलासरूपेणास्मि। ततो राजा प्रकुप्य तमब्रवीत्। रे रे राक्षस, तव पिता मम किं कर्तुं पारयति। राक्षसः क्रुद्धो ब्रूते। रे रे नृपाधम, वयं ब्रह्मराक्षसाः। त्वं कथं मम पितरमधिक्षिपासि। यातु, मयापराधं वारमेकं सोढम्। राजा वदति। वारैकस्य प्रयोजनानि सन्तु। शतवारमधिक्षिपामि। याहि दुष्ट यत्कर्तुं क्षमस्तत्तत्कुरु। ततः कोपवता राक्षसेनोक्तम्। नृपाधम, सर्वमिदानीं राज्यं रक्षि-

ष्यसि। इति निगद्य सहसा पितरं विज्ञाप्य लङ्कापुरीं गत्वा राक्षसानां मेलकं कृत्वारिमौलिमणिनृपतेर्नगरमागम्य स तालजङ्घः पित्रा सह जगाम। प्रच्छन्नरूपेण यान्मानुषान् प्राप्नुवन्ति तान् खादन्तः सन्ति। अथ तालजङ्घेनोक्तम्। मातः कुम्भोदरि, वेश्यारूपमाश्रित्य तं नगरं गत्वा मानुषान् खादित्वा नगरं शून्यं कुरु। तच्छ्रुत्वा कुम्भोदरी वेश्यारूपं धृत्वा कुट्टिनीगृहे वसतिं चकार। कुट्टिनी तामालोक्य पृच्छति। का भवति। सा ब्रूते। मदोन्नता नाम वेश्याहम्। तव गृहे स्थातुमिच्छामि। तयोक्तम्। मद्गृहे सुखेन तिष्ठतु। ततो ये ये तां कामयन्ति ताम् क्रीडाच्छलेन रहसि नीत्वा खादन्ती विद्यते।

अथैकदा वसुदत्तनाम्न उपाध्यायस्य पुत्रो विद्याधरस्तया सह मिलितः। तदा सा विद्याधरमतिसुन्दरं दृष्ट्वा तेन सह क्रीडन्ती विद्यते। अथ निजपत्नीनिर्बन्धाद्दिनमेकं नागतः। तदा राक्षसी कामपीडिता निश्वस्य मातृरूपेण तस्य गृहे रात्रौ गत्वा विद्याधरं निजकान्तया सह रममाणमालोक्य प्रकुप्य तत्रैव भ्रमरी भूत्वा पुष्पघ्राणस्य व्याजेन विद्यते। ततस्तामालोक्य विद्याधरो निजकान्तामब्रवीत्। प्रिये भ्रमरीयं निःसार्यताम्। अस्याः पक्षवातेन दीपो निर्वाणतामेष्यति। ततस्तयोक्तम्। नाथ, पुष्पमधुगन्धेनात्र भ्रमरीयं तिष्ठति। तिष्ठतु। ततो विद्याधरेण दीपनिर्वाणतया हस्तघातेन सा क्षिप्ता। ततः सा मूर्च्छां महतीमासाद्य कथमपि स्वास्थ्यमासादितवती। ततः सा मदोन्नता मनसेत्यचिन्तयत्। यदा मत्समीपमायास्यत्ययं तदास्य रुधिरं मांसं च खादित्वा दुःखमेतत् प्रशमयिष्यामि।

अथापरदिने तया सह क्रीडित्वा गतनिद्रं विद्याधरमियं व्यापादयामास। खर्जूरजङ्घ आगत्य खादितमिमं नीत्वा निजस्थानमागतः। अथ पौरेण ज्ञात्वा तत्त्वमस्याश्चेष्टा राजनि ज्ञापिता। देव, एका राक्षसी वेश्यारूपेण तिष्ठते। सैव पौरजनान् खादति विद्या-

धरोऽपि खादितस्तया। ततोऽरिमौलिमणिर्गत्वा तां पप्रच्छ। रे रे पापिष्ठे, त्वया ब्राह्मणपुत्रः खादितः। तत् पौरेण दृष्ट्वा ज्ञापितोऽहम्। राक्षसी ब्रूते। भवतो भद्रमेव ज्ञापितम्। कुम्भोदरी नाम राक्षस्यहम्। मम भर्ता खर्जूरजङ्घः। पुत्रश्च तालजङ्घः। त्वया मे पुत्रं तिरस्कृत्य शोभावती नीता। तेन कोपेन राक्षसान् गृहीत्वा मम स्वामी विप्रं खादति। ततो राजा सर्वानादिदेश। राक्षसीयं हन्यताम्। सा च निजमूर्तिं धृत्वा तान् सर्वान् तिरस्कृत्य खर्जूरजङ्घस्य स्थानं गता। ततो राजा योग्यलोकं प्रस्थाप्य तस्य प्रीतिमकारयत्। नियमं कृत्वा प्रत्यहं एकजनं ददाति। अनेन विधिना कालं नयमानो विद्यते।

अथैकदा पुत्रवत्या दिवसो मिलितः। सा तु पुत्रमरणमवगम्य रोदिति। इत्येव काले महाबलनाम्ना महाराजेन देशान्तरिणा पृष्टा। मातः किमर्थं रोदिषि। तदा सा महाबलं वृत्तान्तमभ्यधात्। तेनोक्तम्। मातः सर्वान् राक्षसानहं व्यापाद्य तव पुत्रस्य रक्षणं करिष्यामि। गत्वा राजानं ज्ञापय। ततः सा सहसा गत्वा राजानं ज्ञापयामास। राजा च तं नीत्वा वदति। वत्स, यद्येवं तदैतद्राष्ट्रं तुभ्यमहं दास्यामि। ततो हर्षितो महाबलो गत्वा खर्जूरजङ्घं ताडयामास। तदास्य वीर्येण स कातरो भूत्वा ब्रूते। युवराज, रक्ष माम्। युवराजो वदति। प्राणिवधार्थं शपथं कुरु। अरिमौलिमणिनृपतेर्नगरे त्वया बलं न कर्तव्यम्। तच्छ्रुत्वा राक्षसेन सत्यमकारि। तं विमुच्य राजानमगमत्।

राजा कृतकार्यो भूत्वा मन्दादरं कृतवान्। ततः प्रकुप्य कुमारेण भणितम्। तवारिमौलिमणिनामान्यपदार्थसमासेन युक्तम् तस्मान्न युक्तो भवान्। इति निगद्य सहसा महाबलो राक्षसाय स्वातन्त्र्यं दत्वा स्वदेशमगमत्। अथ तेन राक्षसेन तत्पौरजना भक्षिताः। राजा शोभावतीं गृहीत्वा महाबलस्य देशमगमत्। महाबलस्तस्य पूजामाचर्य

परदिने पप्रच्छ । राजन् कथमीदृशी दशा भवतः । ततः कृतापराधेन राज्ञा वक्तुं न ज्ञायते । महाबलेन महात्मना किंचिद्विहस्य पुनर्गत्वा राक्षसं सत्यं कारयित्वा निजकरितुरगसैन्यसामग्रीर्दत्वा तथारिमर्दनमरिमौलिमणिं नृपतिं कृत्वा स्वदेशमगमत् ।

वेतालो वदति । वदतु देव । स पौरजनविघातापराधी किमरिमौलिमणिः किं वा महाबलः किमथ राक्षसस्तालजङ्घः । राजा वदति । शृणु रे वेताल । पौरजनानां वधोऽरिमौलिमणौ राजनि नान्यस्मिन् । इति प्रश्नच्छलेन नृपतेर्मौनभङ्गं कृत्वा वेतालः शिंशपावृक्षे पुनर्ललाग ।

इति त्रयोविंशतितमो वेतालकथाप्रबन्धः ।

[चतुर्विंशतितमी कथा ।]

अथ पुनरानीयमानो वेतालः कथामपरां कथयति ।

देव, अस्ति नर्मदातीरे धर्मपुरनामधेयं नगरम् । तत्र जीमूतवाहनो नाम राजा बभूव । स राजामात्यसहितः सुखासीन आस्ते इत्यत्र काल एका स्त्री करुणस्वरेण रोदिति । क्रन्दनं श्रुत्वा राजा प्रतीहारमादिदेश । प्रतीहार, का रोदितीति गत्वा विचारय । ततो गत्वा वदति । मातः का त्वं कथं वा रोदिषि । सा ब्रूते । पुत्र, नागमाताहम् । ममाष्ट पुत्रा गरुडेन खादिताः । एष एकः पुत्रो विद्यते । तमपि वैरिभावेन खादितुं स्पृहयति । तेनाहं क्रन्दामि । ततः प्रतीहारो गत्वा राजानं ज्ञापयामास । देव, शङ्खनाम्नो नागस्य माता रोदिति । तस्याष्टौ पुत्रा गरुडेन खादिताः । एक एव पुत्रो विद्यते । तमपि वैरिभावेन खादितुं स्पृहयति । भविष्यच्छोकमधिगम्य रोदिति ।

तच्छ्रुत्वा राजा वदति। प्रतीहार, गत्वा तां ज्ञापय। अहं तस्याः पुत्र-रक्षां करिष्यामीति। किन्तु गरुडस्यागमनकालं समधिगम्य मां नेष्यति। तच्छ्रुत्वा प्रतीहारो गत्वा नागमातरमब्रवीत्। नागमातस्तव पुत्रं राजा रक्षिष्यति। किन्तु गरुडागमनकाले राजानं ज्ञापयिष्यति। इत्युक्त्वा चलितः।

अथ तया गरुडागमनकाले नीतो राजा परमधार्मिको जीमूतवाहनस्तस्मै गरुडाय स्वदेहमुपढौकितवान्। ततो गरुडो नृपतेः पार्श्वमेकमखादयत्। अनन्तरं पार्श्वपरिवर्तनमाचर्यापरपार्श्व-मुपनीय वदति। हे महाशयखगेश्वर, एतत् पार्श्वमपि सुखेन खादित्वा निजस्थानं सर्पतु भवान्। तच्छ्रुत्वा सहसा वितर्क्य गरुडो विस्मितोऽचिन्तयत्। कोऽयं महाशयः पापिष्ठेन मया खादितः। अन्ये तावन्मद्दर्शनेन प्राणांस्त्यजन्ति। अयं च खाद्यमानोऽपि प्रसन्न एतद्वचनं वदति। विशेषतश्च यज्ञोपवीतधारी दृश्यते। तस्माद् ब्रह्म-वधं कृतवानस्मि। इति विचिन्त्य गरुडस्तमब्रवीत्। भो महासत्त्व, किं ब्राह्मणो भवान्। राजा वदति। नाहं विप्रः। सन्देहं विमुच्य भवान् मां खादतु। गरुडो वदति। किं क्षत्रियोऽसि। तच्छ्रुत्वा राजा तूष्णीं स्थितः। गरुडः पुनस्तमब्रवीत्। भो महासत्त्व, भवतो वर्णः समधिगतः। किन्तु निजनाम पापिष्ठं मां ज्ञापय। निर्बन्धा-तिशयेन राजा ब्रूते। पक्षिराज, जीमूतवाहननृपतिरहम्। गरुडो वदति। अहं तावन्नागान् खादामि, तद् भवान् कथमात्मानं खादयति। इति पृष्टो ब्रूते। खगेश्वर, शङ्खस्य मातुरष्टौ पुत्रा भवता खादिताः। एक एव पुत्रोऽवशिष्टः। तमपि खादितुं स्पृहयति भवान्। इति सा रोदिति। तदाहं प्रतिज्ञातस्तस्य रक्षार्थमात्मशरीरमुपनीतवान्।

तच्छ्रुत्वा दुःखितो भूत्वा पातालं प्रविश्यामृतमानीय गरुडो जीमूतवाहनस्य शरीरं सम्पूर्णं कर्तुमुद्यतोऽभवत्। तदा राजा वदति।

भो पक्षिराज, यद्येवं स्यात्तदाष्टौ नागपुत्रान् जीवयाग्रतः। पश्चाद्य-द्युक्तं तदाचरिष्यति भवान्। एतेन वचनेन गरुडः प्रीतो भूत्वा तान् सर्वान् जीवयित्वा पश्चान्नृपतिं जीवयति स्म। ततः सा नागमाता नवपुत्रसहिता सुप्रीता निर्भया तत्रैव स्थिता। जीमूतवाहनोऽपि स्वमा-लयमाजगाम।

जीमूतवाहनगरुडयोर्मध्ये को महायशा इति वदतु देव। राजा वदति। शृणु रे वेताल। जीमूतवाहनः पक्षिराजो मां यज्ञो-पवीतधारिणमालोक्य न खादिष्यति। विशेषतश्च तेन सह मम विरोधो नास्ति। तस्मान्नागपुत्रस्य रक्षणमाचर्य महापुण्यं प्राप्नोमीति विचिन्त्य गरुडाय स्वशरीरमुपनीतवान्। किन्तु गरुडो महायशाः। नृपताविति-वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

इति चतुर्विंशो वेतालकथाप्रबन्धः।

[पंचविंशतितमी कथा।]

अथ राजा वेतालं शाखां शाखां भ्रामं भ्रामं कदर्थ्यैकवृद्ध-शाखायां विधृत्य स्थितः। राजा प्रबन्धेनानेतुमक्षमो भूत्वा खड्गेन शाखामुच्छिद्य शाखासमेतं वेतालं स्कन्धे कृत्वा मौनपरायणो भूत्वा क्षान्तिशीलसमीपं गन्तुमुपचक्रमे। तथापि वेतालः गुरुवाक्यं प्रश्नमकार्षीत्।

देव, दक्षिणस्यां दिशि धर्मसेनो नाम राजासीत्। तस्य महा-देवी चन्द्रावती। तस्यामनेन विलासवती नाम कन्या समुत्पादिता। एकदा सिंहलेश्वरो राजा तं धर्मसेनं जेतुमागतः। तदानीमन्योन्य-युद्धं तयोर्नृपत्योरभूत्। अथ बलवता सिंहलेश्वरेण पराजितो धर्मसेनः स्वराज्यं विहाय हयमारुह्य वनं प्रविवेश। तद्वृत्तान्तमधिगम्य तस्य

महादेवी चन्द्रावती दुहितरं विलासवतीमादाय वनं प्राप्तवती। अथ तत्रैव वने प्रचण्डसिंहो नाम क्षत्रियो मृगान्वेषणाय ससुत आजगाम। स कर्दमे स्त्रीद्वयपदचिह्नं निरीक्ष्य प्रचण्डसिंहः पुत्रमब्रवीत्। भो पुत्र, दिव्यस्त्रीद्वयस्य पदचिह्नमुपलक्ष्यते। तद् यदि स्त्रीद्वयं प्राप्तव्यं तदा दीर्घचरणा मम भार्या ह्रस्वचरणा तव भार्या। तच्छ्रुत्वा तत् पुत्रेण स्वीकृतम्। ततस्तेन पदचिह्नेन गत्वा चन्द्रावती विलासवत्यौ सरोवरे ताभ्यां प्राप्ते। तद्दैववशाद् दीर्घचरणा प्रचण्डसिंहेन स्वीकृता ह्रस्वचरणा तत्पुत्रेण स्वीकृता। कालवशात् तयोस्ताभ्यां पुत्रावुत्पादितौ। तत्कुमारयोः सम्बन्धः को भवतु। क्रोधं विमुच्य सन्देहच्छेदमारभतु देव।

तच्छ्रुत्वा राजा विपरीतसम्बन्धपरिच्छेद आसक्त इवासीत्। अज्ञात्वोत्तरं न दातुं दोषो नासीत्। इति विचिन्त्य दृढमौनेन क्षान्तिशीलसमीपं गच्छन् विद्यते। वेतालो वदति। भो राजन्, अनेन सत्त्वेन गुणविशेषेण त्वयि प्रीतोऽस्मि। त्वं विजयी भव। किन्तु तव हितं यद्वदामि तच्छ्रुणु। राजोवाच। को भवान् मृतकाधिष्ठितः केन वा सर्वज्ञता तवाधिष्ठात्री। तदहं श्रोतुमिच्छामि। श्रुत्वा विहस्य वेतालोऽब्रवीत्। शृणु राजन्, मम वृत्तान्तम्।

अहमिह राजधान्यां जातितैली गृहस्थः स्थितोऽस्मि। एकदा दैवयोगेन मम गृहे ज्ञानी पुरुषैकः समागत्य मिलितः। कतिपयमासान् मदीयायतने मठं कृत्वा मया सह स्थितः। प्रतिदिनं तस्मै भिक्षाभोजनान्नं कल्प्यते। अनन्तरं वर्षाप्रभाते तेन ज्ञानिना देशान्तरे गन्तव्यमिति कृत्वा निभृतमहमुक्तो विशेषेण। भो गृहस्थ, अस्माकमनेकसेवां कृत्वा तिष्ठसि। तेन त्वयि परितुष्टोऽस्मि। आगच्छ, ते ज्ञानसिद्धिं कथयामि। इति कृत्वा कृपया मह्यं सिद्धिज्ञानं कथयामास। पुनः सत्यमिदं कारयांचक्रे। मम पूर्वसेवकः पुत्रप्रतिमो

वर्षाभ्यन्तरे ममान्वेषणे समागमिष्यति । तस्मै ज्ञानं कथयिष्यामीति स्वीकृत्य तिष्ठामि । स तु मम गमनसमये समागत्य न मिलितः समीक्ष्यते । यदि त्वमस्माकं सत्यं पालयसि तदा तस्मिन्नत्र ब्रह्मणोद्देशे समायाते ज्ञानमिदं तस्मै त्वं विज्ञापयिष्यसि । स च तव भ्राता । तस्मै कपटं न करिष्यसि । यद्येवं न करोषि तदा तव दुर्विपाकेनानेन मम शापेन विपरीत मरणं ते भविष्यति । सुदृढमिति कृत्वा गुरुर्मे मामुद्दिश्य देशान्तरं चचाल । अत एव निगद्यते । त्वमस्मदीय उपदेशेऽवहेलां न करिष्यसि ।

इति प्रतिपाद्य वेतालः तूष्णीं चकार । ततो राजा विहस्य वेतालं पुनराह । भो वेताल, निगद्यतां तद्वृत्तान्तम् । ततो वेतालो हसित्वा पुनराह ।

शृणु राजन् । ज्ञानिनि मम गुरौ देशान्तरे गते तच्छिष्यः समागत्य ममाश्रमे मिलितः । आगत्य मामुवाच । योऽसौ ज्ञानी चात्र स्थितः स तु क्व । तदा मयोक्तम् । स तु देशान्तरं जगाम । मां प्रति किं विधानं कृत्वा गतः । तस्मै मयोक्तं न किञ्चित् । इति श्रुत्वा स हा हा हतोऽस्मीति कृत्वा बहु विलप्य निराशो भूत्वा जगाम । गते तस्मिंस्ततः प्रभृति मया तदुपदेशं ध्यायतासुखेन गृहवासः क्रियते । गुरुवचनमन्यथाकुर्वाणे सापराधे मयि शङ्का महती बाधते ।

ततो दैवयोगेन राजभवने चौराश्चुरीं कृत्वानेकसामग्रीमपहृत्याश्वशालायां घोटकैकं गृहीत्वा मम द्वारि बन्धनं कृत्वा विहाय चौराः पलायिताः । प्रभाते राजा चुरीं श्रुत्वा दुःसाधुमानीय समादिदेश । अरे दुःसाधो मदीयभाण्डारे चुरी कृता, घोटकोऽश्वशालाया नीतोऽस्ति । ज्ञायतामस्य निर्णयः । सुदृढमपि ज्ञात्वा शीघ्रमागच्छ । यदि चौरं समानीय न ददासि तदा त्वामेव सपरिवारमेकत्र कर्तयित्वा

प्रोथयिष्यामि। इति श्रुत्वा दुःसाधुना गृहे गृहे चौरान्वेषणं कृत्वा मम द्वारि घोटकं प्राप्य मामपि धृत्वा चौरमिति कृत्वा राजनि विज्ञाप्य घोटको दर्शितः। श्रुत्वा राजा सकोपः समादिदेशैनम्। शूले नीत्वा देहि। तथा तैरेव राजादेशं शिरसि निधाय ग्रामोपान्ते समानीयाहं तेनैव दण्डपाशिकैः शूलेन समारोपितः। शूले स्थित्वा योगबलेन समाधिना प्राणान् वाहयित्वा क्रमशो गलिते हृदि पुनरहं ततः सम्मुखस्थितघर्घरातीरवर्तिवृक्षे वेतालाधिष्ठितो भूत्वा विश्रमितोऽस्मि। ज्ञानबलेन सर्वज्ञता मयि समुत्पन्ना।

स तु मम गुरुशिष्यो देशे देशे परिभ्रम्य हिंगुलादेवीसमीपवर्तिनि देशान्तारिणां विश्रामस्थानमण्डपे गुरुं ददर्श। दृष्ट्वा सर्ववृत्तं गुरवे निवेदितम्। श्रुत्वा व्यथितेन गुरुणा प्रोक्तम्। स तु गृहाश्रमी तैलिको मदीयज्ञानमपहृतवान्। तेन तस्य यथोचितं फलं भूतम्। स तु ज्ञानबलेन वेतालाधिष्ठितः प्रेतो भूत्वा शिंशपातरोः शाखायां मङ्गलकोटिराजधान्यां घर्घरातीरे लम्बमानोऽवतिष्ठते। त्वयि परितुष्टोऽस्मि। त्वमस्मदीयः पुत्रः। मम प्रसादेन त्वय्यृद्धिः सुसाध्या। ममोपदेशेन वरेण सिद्धिस्ते भविता। ऋद्धिसिद्धिभ्यां त्वमेव खेचरो भूत्वा सुखेन परिभ्रम। इत्युक्त्वा कुणपो विरराम।

तच्छ्रुत्वा राजा हर्षगद्गदवाचा पुनरिममाह। अरे कुणप, यदि प्रसन्नोऽसि तदाशेषविशेषेण कथां सकलां कथय। समुपदिश किमहं करिष्यामि। ततो वेतालः पुनरुवाच। शृणु रे महाराज। त्वं देवरूपी मानुषविग्रहः। पूर्वसञ्चितानि महान्ति तपांसि ते सन्ति। तेन भाग्योदयेन त्वमत्रानीतोऽसि। शृणु। अहं कथयामि।

ततः प्रसन्नेन गुरुणा पुनरुपदिष्टः। त्वमितो महासत्त्वमहाराजश्रीविक्रमादित्यस्य राजधानीं गत्वा तस्य राज्ञ उपढौकनाय बिल्वफलाभ्यन्तरे रत्नानि विनिवेश्य दिनकतिपयं योजयित्वा महासत्त्वं

सहायं कृत्वा प्रेताधिष्ठितज्ञानिनं राजसहायेन दक्षिणश्मशाने नीत्वा तं शवं राजानं च मण्डलं रचयित्वा तत्र नीत्वा मण्डलपूजां विधाय शवस्य मस्तके पादं दत्वा राजानं देव्यै बलिं दत्वा शवद्वयमस्तके पादद्वयं दत्वा निगदिष्यसि। देवि, गृहाण मम सत्त्वबलिम्। ऋद्धि-सिद्धी मे भवताम्। इति निगदिते त्वयि देव्याः प्रसादोऽयं भवि-ष्यति। इति गुरूपदेशं प्राप्य स तु क्षान्तिशीलः समागत्य कपट-भावेन भवन्तं वशीकृत्य भवद्वशेन मामेवं गृहीत्वा त्वामपि कर्तयित्वा सिद्धिं साधयिष्यति। सर्वमिदं रहस्यं ते ज्ञापितम्। ज्ञात्वैतद् यदुचितं तद् विधीयताम्। इत्युक्त्वा विरराम।

